भावार्थ—तृतीय काल में जब पल्य का आठवाँ भाग बाकी रह गया तब क्रम-क्रम से भोगभूमि नष्ट होकर कर्मभूमि प्रारम्भ हुई। भगवान् वृषभदेव के होते-होते कल्पवृक्ष नष्ट हो गये तथा बिना बोये अपने आप उत्पन्न होनेवाली धान्य का उपजना बन्द हो गया। आजीविका के बिना लोग दुखी होने लगे तब सब लोग अन्तिम कुलकर नाभिराज की सम्मति से भगवान् वृषभदेव के पास गये। सबने अपना दुःख प्रकट किया उसी समय भगवान् ने अवधिज्ञान से विदेह क्षेत्र की कर्मभूमि की व्यवस्था को जानकर भरतक्षेत्र में भी वही व्यवस्था चालू की। सबके लिये कृषि-खेती करना, मषी—लेखन कार्य करना, असि—शस्त्र चलाना, विद्या-गायन वादन आदि मनोरंजन के कार्य करना, शिल्प—कला-कौशल के द्वारा वस्तुओं का निर्माण करना और वाणिज्य—व्यापार करना इन छह कार्यों का उपदेश दिया। नगरी आदि की रचना कर राजा प्रजा का विभाग स्थिर किया। इस सब व्यवस्था के कारण भगवान् प्रजापति—तीन लोक की समस्त प्रजा के स्वामी हुए और बाद में हेय—छोड़ने योग्य तथा उपादेय—ग्रहण करने योग्य तत्वों का विशिष्ट ज्ञान प्राप्त कर वे संसार से विरक्त हो गये, इन्द्र आदि देवों ने उनके दीक्षा-कल्याणक आदि आश्चर्यकारी उत्सव किये तथा केवलज्ञान प्राप्त कर वे ज्ञानियों में श्रेष्ठ बन गये। इन्हीं सब घटनाओं का वर्णन इस पद्य में किया गया है ॥ २ ॥

निर्विण्णः सन् भगवान् किं कृतवा नित्याह—

विहाय यः सागरवारिवाससं वधूमिवेमां वसुधावधूं सतीम् ।
मुमुक्षुरिक्ष्वाकुकुलादिरात्मवान् प्रभुः प्रवव्राज सहिष्णुरच्युतः ॥ ३ ॥

---

१. गर्भावतारात् ख० ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विहायेत्यादि—यो विनिर्विण्णो नाभिनन्दनः स प्रवव्राज प्रव्रज्यां गृहीतवान् । किं कृत्वा ? विहाय त्यक्त्वा कां ? वसुधावधूं वसु द्रव्यं दधातीति वसुधा सैव वधूर्महिला ताम् । नारकादिवसुधा तेन त्यक्ता भविष्यतीत्याहइमां दृश्यमानां, किं विशिष्टां ? सागर-वारिवाससं सागरः समुद्रस्तस्य वारि पानीयं तदेव वासः परिधानं यस्यास्तां सकलसमुद्रपर्यन्तां पृथ्वीं त्यक्त्वेत्यर्थः । पुनरपि कथंभूतां ? सतीम, अन्येनाभुक्तां, कामिव ? वधूमिव यथा निर्विण्णेन भगवता सती वधूः अन्तःपुर—महिला परित्यक्ता तथा सापीत्यर्थः । किं विशिष्टोऽसौ तां विहाय प्रवव्राजेत्याह—मुमुक्षुर्मोक्तुमिच्छुर्मुमुक्षुः संसारसमुद्रादुत्ति तीर्षुरित्यर्थः । पुनरपि किंविशिष्टः ? इक्ष्वाकुकुलादिः इक्ष्वाकवो राजानस्तेषां कुलं वंशस्तस्यादिः, आत्मवान् वश्येन्द्रियः अतएव प्रभुः स्वतन्त्रः, सहिष्णुः परीषहैरपराजितस्तान् सोढुं समर्थइत्यर्थः, अतएवाच्युतो दुःसहपरीषहक्लेशोपनिपाते प्रतिज्ञातव्रतादनपसृतत्वात् अचलितत्वात् ॥ ३ ॥

विरक्त होते हुए भगवान् ने क्या किया यह कहते हैं—

अन्वयार्थ—(यः) जो (मुमुक्षुः) मोक्ष के अभिलाषी अथवा संसार समुद्र से पार उतरने के इच्छुक थे, (आत्मवान्) जितेन्द्रिय थे, (प्रभुः) सामर्थ्यवान् अथवा स्वतन्त्र थे, (सहिष्णु) परीषह आदि की बाधाओं को सहन करने वाले थे, (अच्युतः) गृहीतव्रत से अविचलित रहने वाले थे, (इक्ष्वाकुकुलादिः) इक्ष्वाकुकुल अथवा समस्त राजवंशों में आदि पुरुष थे और जिन्होंने (सतीम्) किसी अन्य राजा के द्वारा अमुक्त होने से पतिव्रता (इमाम्) इस (सागरवारिवाससम्) समुद्र के जल रूप वस्त्र को धारण करने वाली—समुद्रान्त, (वसुधावधूम्) धनधान्य से परिपूर्ण पृथिवी रूपी स्त्री को (सतीं वधूमिव) पतिव्रता स्त्री के समान (विहाय) छोड़कर (प्रवव्राज) दीक्षा धारण की थी ।

भावार्थ—भगवान् वृषभदेव कर्मभूमि के प्रथम राजा थे, इनके पहले भरतक्षेत्र में भोगभूमि की व्यवस्था रहने से कोई राजा नहीं था, इन्द्र ने प्रथम राज्याभिषेक इन्हीं का किया था। और उस समय की पृथिवी सचमुच ही वसुधा अर्थात् वसु-धनको धारण करने वाली थी फिर भी विरक्त होकर भगवान् ने इस समुद्रान्त पृथिवो को इस प्रकार छोड़ दिया जिस प्रकार की अन्तःपुर की स्त्री सुनन्दा और यशस्वती को छोड़ दिया था। इस पृथिवी के छोड़ने का मूल कारण यही था कि भगवान् मुमुक्षु थे, संसार के बन्धन से छूटकर मोक्ष प्राप्त करने के इच्छुक थे । वे जितेन्द्रिय थे इसलिये संसार के प्रलोभन उन्हें लुभा नहीं सके, वे स्वतन्त्र थे इसलिये दो स्त्रियों सौ पुत्रों तथा दो पुत्रियों का विशाल परिवार उन्हें रोकने में समर्थ नहीं हो सका, वे सहनशील थे इसलिये लगातार एक वर्ष तक क्षुधा-तृषा आदि परीषहों की बाधा सहन करते रहे और अच्युत थे—गृहीत व्रत से विचलित होनेवाले नहीं थे इसीलिये देखासीखी साथ में दीक्षा लेने वाले चार हजार राजाओं के विचलित हो जाने पर भी वे अपने पथ पर अडिग बने रहे ॥ ३ ॥

प्रव्रज्यामादाय भगवान् किं कृतवानित्याह—

स्वदोषमूलं स्वसमाधितेजसा निनाय यो निर्दयभस्मसात्क्रियाम् ।
जगाद तत्त्वं जगतेऽर्थिनेऽञ्जसा बभूव च ब्रह्मपदामृतेश्वरः ॥ ४ ॥

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्वदोषेत्यादि—स्वस्यात्मनो दोषा रागादयस्तेषां मूलं घातिकर्मचतुष्टयं तत् निनाय नीतवान्। कां? निर्दयभस्मसात्क्रियाम् दयातो निष्क्रान्ता निर्दया सा चासौ भस्मसात्क्रिया च कात्स्र्येन भस्मकरणं भस्मसात्क्रिया ताम्। केन? स्वसमाधितेजसा स्वस्य समाधिः परमशुक्लध्यानं स एव तेजोऽग्निस्तेन तत्क्रियां तन्नयन् स किं कृतवानित्याह—जगाद कथितवान् किं? तत्वं जीवादि स्वरूपं, कस्मै? जगते प्राणिगणाय, कथंभूताय? अर्थिने तत्वपरिज्ञानाभिलाषिणे। सुगतवत्–[१]बुद्धवत् पर-प्रतारकत्वेनासौ तत्वं कथितवानित्याहअञ्जसा परमार्थेन। ननु बुभुक्षादि-दुःखपीडितः कदाचिद्वितथमपि कथयिष्यत्यतोऽञ्जसेतअभुक्तमित्यत्राह—बभूव च ब्रह्मपदामृतेश्वरः बभूव च संजातवांश्च कथंभूतो ब्रह्मपदामृतेश्वरः ब्रह्मपदं मोक्षस्थानं तस्यामृतमनन्तं सुखं तस्येश्वरः स्वामी अतः कथं तत्र [२]क्षुद्दुःखलेशोऽपि यतः केवलिभुक्तिपरिकल्पना श्रेयसी स्यात्॥ ४॥

दीक्षा लेकर भगवान् ने क्या किया यह कहते हैं—

अन्वयार्थ—(यः) जिन्होंने (स्वदोषमूलम्) अपने काम-क्रोध आदि समस्त दोषों के मूल कारण—चार घातिया कर्मों को (स्वसमाधितेजसा) परमशुक्लध्यान रूपी अग्निके द्वारा (निर्दय-भस्मसात्क्रियां निनाय) निर्दयतापूर्वक भस्मभाव को प्राप्त कराया है—समूल नष्ट कर दिया तथा जिन्होंने (अर्थिने जगते) तत्वज्ञान के अभिलाषी प्राणिसमूह के लिये (अञ्जसा) वास्तविक (तत्त्वं) जीवादि तत्वों का स्वरूप (जगाद) कहा (च) और अन्त में जो (ब्रह्मपदामृतेश्वरः) मोक्षस्थान के अविनाशी-अनन्त सुख के स्वामी (बभूव) हुए।

भावार्थ—भगवान् वृषभदेव ने दीक्षा लेकर एक हजार वर्ष तक कठिन तपश्चर्या की और उसकी साधना के फलस्वरूप शुक्लध्यान के द्वारा अपने काम-क्रोधादि समस्त विकारी भावों के मूल कारण-चार घातिया कर्मों को नष्टकर अरहन्त अवस्था प्राप्त की। समवसरण की रचना हुई और गन्धकुटी में विराजमान होकर उन्होंने तत्वज्ञान के अभिलाषी प्राणियों को समीचीन उपदेश दिया। यहाँ यह बात ध्यान देने योग्य है कि भगवान् ने दूसरों को उपदेश तब दिया जब अपने विकारी भावों को पहले स्वयं नष्ट कर लिया और यथार्थ में क्रम भी यही है कि जब तक मनुष्य अपने दोषों का शमन न कर ले तब तक उसे दूसरे के लिये उपदेश देना शोभास्पद नहीं होता। प्रत्येक तीर्थंकर दीक्षा लेने के बाद जब तक दोषों का शमन कर सर्वज्ञ नहीं बन जाते तब तक का समय मौन से ही व्यतीत करते हैं। अरहन्त भगवान् वीतराग और सर्वज्ञ होते हैं इसलिये उनका उपदेश यथार्थ ही होता है। अरहन्त अवस्था में तथा उसके बाद प्रकट होनेवाली सिद्ध अवस्था में वे भगवान् अनन्त सुख के स्वामी थे इसलिये क्षुधा-तृषा आदि सम्बन्धी दुःख दूर करने के लिये केवली कवलाहार करते हैं ऐसी कल्पना करना ठीक नहीं है॥ ४॥

अत्राह मीमांसको, भगवतोऽतीन्द्रियज्ञानविकलतया सकलार्थपरिज्ञानासंभवात् कथमञ्जसा तत्त्वप्रतिपादनं घटेतेत्याह—

स विश्वचक्षुर्वृषभोऽर्चितः सतां समग्रविद्यात्मवपुर्निरञ्जनः।
पुनातु चेतो मम नाभिनन्दनो जिनो जितक्षुल्लकवादिशासनः॥ ५॥

१. ख पुस्तके 'बुद्धवत्' नास्ति, २. क्षुद्र क्षुद्–ख.।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स विश्वचक्षुरित्यादि--प्रागुक्त विशेषणविशिष्टो भगवान् विश्वचक्षुः चक्षुरिवचक्षुः केवलज्ञानं पदार्थप्रकाशनहेतुत्वात् विश्वस्मिन् त्रैलोक्योदरवर्तिवस्तुसंघाते चक्षुः प्रकाशकत्वेन प्रवृत्तं केवलज्ञानं यस्य सः। किन्नामासौ ? वृषभो वृषो धर्मस्तेन भाति शोभते स वा भाति प्रकटी भवति यस्मादसौ वृषभः। कथंभूतः ? अर्चितः पूजितः, केषां ? सतां विपश्चिताभिन्द्रादीनाम्। ननु सकलकर्मक्षयात्पूर्वमसौ विश्वचक्षुरस्तु तत्प्रक्षये तु जडो भविष्यसि बुद्धयादि विशेषगुणादीनामत्यन्तोच्छेदादिति यौगाः। चैतन्यमात्ररूप इति सांख्याः। अत्राह—समग्रविद्यात्मवपुर्निरञ्जनः अञ्जनात् ज्ञानावरणादिकर्मणो निष्कान्तो निरञ्जनः सकल कर्मविप्रमुक्तः सन्नात्मा समग्रविद्यात्मवपुर्भवति न जडो नापि चैतन्यरूपः समग्राः सम्पूर्णा जीवाद्यशेष[1] वस्तुविषया विद्या बुद्धिरात्मनो वपुः स्वरूपं यस्य सः। इत्थंभूतो भगवान् किं करोतु ? पुनातु पवित्रीकरोतु सकलदोषविशुद्धं करोत्वित्यर्थः। किं तत् ? चित्तमात्मस्वरूपं, कस्य ? मम स्तुतिकर्तुः, पुनरपि कथंभूतो वृषभः ? नाभिनन्दनः नाभेश्चतुर्दशकुलकरस्य नन्दनः सुतः। जिनो निखिलवाह्याभ्यन्तर-शत्रुनिर्मूलोन्मूलकः। जितक्षुल्लकवादिशासनः क्षुल्लकानि लघूनि क्षुद्राणि विशिष्टपुरुषप्रणीतत्वाभावात् तानि च तानि वादिशासनानि च परस्परविरुद्धं सर्वथानित्यक्षणिकादितत्त्वं वदन्तीति वादिनः कपिलेश्वरसुगतादयस्तेषां शासनानि मतानि जितानि क्षुल्लकवादिशासनानि येनेति। अजित क्षुल्लकवादिशासन इति च पाठः,[2] न जितं क्षुल्लकवादिभिः शासनं यस्य ॥ ५ ॥

यहाँ मीमांसक कहता है कि चूँकि भगवान् को अतीन्द्रिय ज्ञान का अभाव होने से समस्त पदार्थों का ज्ञान संभव नहीं है अतः तत्त्वों का यथार्थ प्रतिपादन कैसे हो सकता है ? यह कहते हैं—

अन्वयार्थ—(विश्वचक्षुः) जिनका केवलज्ञान रूपी चक्षु समस्त पदार्थों को विषय करने वाला है, जो (सताम्) इन्द्र आदि सत्पुरुषों के (अर्चितः) पूजित हैं, (समग्रविद्यात्मवपुः) जीवाजीवादि समस्त पदार्थों को विषय करने वाली बुद्धि ही जिनकी आत्मा का स्वरूप है, (निरञ्जनः) ज्ञानावरणादि कर्ममल से रहित होने के कारण जो निर्मल हैं, (नाभिनन्दनः) चौदहवें कुलकर नाभिराज के पुत्र हैं, (जिनः) कर्मरूप शत्रुओं को जीतने वाले हैं, और (जितक्षुल्लकवादिशासनः (जिन्होंने क्षुद्रवादियों के शासन को जीत लिया है अथवा (अजित क्षुल्लक वादिशासनः) जिनका शासन क्षुद्रवादियों के द्वारा नहीं जीता जा सका है (सः) वे (वृषभः) धर्म से सुशोभित रहने वाले अथवा धर्म को सुशोभित करने वाले वृषभनाथ भगवान् (मम) मेरे (चेतः) चित्त को (पुनातु) पवित्र करें—रागादि विकारी भावों से रहित कर निर्मल बनावें ॥ ५ ॥

भावार्थ—मीमांसक सर्वज्ञ को नहीं मानता इसलिये उसने कहा था कि अतीन्द्रिय ज्ञान से रहित होने के कारण भगवान् को समस्त पदार्थों का ज्ञान संभव नहीं है और इस दशा में वे यथार्थ ही तत्त्व का प्रतिपादन करेंगे यह नहीं कहा जा सकता....इसका समाधान करने के लिये इस पद्य में कहा गया है कि भगवान् वृषभदेव विश्वचक्षु हैं। यहाँ चक्षु का अर्थ पदार्थ प्रकाशक होने के कारण केवलज्ञान लिया है अर्थात् भगवान् का केवलज्ञान रूप चक्षु समस्त पदार्थों को

१. जीवाद्यशेष विषया ख०। २. पाठे तु ख०।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रकाशित करने वाला है। फलतः वे सर्वज्ञ हैं और साथ ही निरञ्जन भी हैं—कर्ममल कलंक से रहित हैं इसलिये उनके द्वारा पदार्थों का प्रतिपादन यथार्थ ही संभव है, अयथार्थ नहीं। भगवान् की आत्मा ज्ञान आदि गुणों से तन्मय रहती है इसलिये यौगों के समान बुद्धि आदि गुणों के सर्वथा उच्छेद की आशंका और सांख्यों के समान पदार्थ ग्रहण की शक्ति के अभाव की कल्पना श्रेयस्करी नहीं है। यहाँ स्तुति कर्ता स्तुति के फलस्वरूप किसी सांसारिक–भौतिक फल की चाह न कर मात्र यह इच्छा प्रकट करते हैं कि भगवान् मेरे हृदय को पवित्र करें—रागदि विकारों से उसे मलिन नहीं होने दें, मैं निरञ्जन–कर्म कलङ्क से रहित जिनेन्द्र की उपासना कर रहा हूँ इसलिये उसके फलस्वरूप हृदय की निरञ्जनता—कर्म कलङ्क रहितता होना ही चाहिये ॥ ५ ॥

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(२) श्री अजितजिनस्तवनम्

यस्य प्रभावात्त्रिदिवच्युतस्य क्रीडास्वपि क्षीवमुखारविन्दः ।
अजेयशक्तिर्भुवि बन्धुवर्गश्चकार नामाजित इत्यबन्ध्यम् ।। १ ।।

यस्य प्रभावादित्यादि—[1]उपजातिछन्दः । यस्य नाम चकार कृतवान् । कौऽसौ ? बन्धुवर्गः, कथंभूतस्य ? त्रिदिवच्युतस्य त्रिदिवात्स्वर्गात् च्युतोऽवतीर्णस्तस्य, किंविशिष्टो बन्धुवर्गः ? अजेय-शक्तिः न जीयत इत्यजेया शक्तिः सामर्थ्यं यस्य, क्व ? क्रीडास्वपि न केवलं महायुद्धेषु, कुतः ? प्रभावान्माहात्म्याद्यस्येत्येतदत्राप्यभिसंबन्ध्यते, पुनरपि किंविशिष्टोऽसौ ? क्षीरमुखारविन्दः मुख-मेवारविन्दं कमलं मुखारविन्दं क्षीवं समदं हर्षितं मुखारविन्दं यस्य इत्थंभूतो बन्धुवर्गो बन्धुसमूहः, तस्य नाम चकार कृतवान्, भुवि पृथिव्यां, कथंभूतं नाम ? अजित इति न केनचिज्जीयत इत्य-जितः, अतएवावन्ध्यमन्वर्थम् ।

भगवान् के अजित नाम की सार्थकता बतलाते हैं—

अन्वयार्थ—(त्रिदिवच्युतस्य) स्वर्ग से अवतीर्ण हुए (यस्य) जिनके (प्रभावात्) प्रभाव से उनका (बन्धुवर्गः) कुटुम्बि समूह (क्रीडास्वपि) बालक्रीडाओं में भी (क्षीवमुखारविन्दः) हर्षोन्मत्तमुख कमल से युक्त हो जाता था तथा जिनके प्रभाव से वह बन्धुवर्ग (भुवि) पृथिवी पर (अजेय शक्ति) अजेय शक्ति का धारक रहता था और इसीलिये उस बन्धुवर्ग ने (यस्य) जिनका (अजितः) अजित (इति) यह (अवन्ध्यम्) सार्थक (नाम) नाम (चकार) रक्खा था ।

भावार्थ—भगवान् अजितनाथ विजय नामक अनुत्तर विमान से च्युत होकर अयोध्या के राजा जितशत्रु की रानी विजयसेना के गर्भ से उत्पन्न हुए थे । वे इतने प्रभावशाली थे कि उनके उत्पन्न होते ही कुटुम्बीजनों का समूह उनके प्रभाव से बड़े-बड़े युद्धों की बात दूर रहे बालक्रीड़ाओं में भी कभी किसी से पराजित नहीं होता था। अपनी इस अजेय शक्ति के कारण उसका मुख कमल सदा विजय के गर्व से उल्लसित रहता था और इसीलिये उसने उनका 'अजित' जो किसी के द्वारा जीता न जावे—ऐसा सार्थक नाम रक्खा था ।। १ ।।

अत एवेष्ट प्रयोजन सिद्धचर्थं भव्यजनैरिदानीमपि तदुच्चार्यंत इत्याह—

अद्यापि यस्याजितशासनस्य सतां प्रणेतुः प्रतिमङ्गलार्थम् ।
प्रगृह्यते नाम परं पवित्रं स्वसिद्धिकामेन जनेन लोके ।। २ ।।

---

१. 'अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयानुपजातयस्ताः' जिसके चरण इन्द्रवज्रा और उपेन्द्रवज्रा से मिश्रित हों उसे उपजाति कहते हैं । 'स्यादिन्द्रवज्रा यदि तौ जगौ गः' जिसमें दो तगण एक जगण और दो गुरु हों वह इन्द्रवज्रा है । 'उपेन्द्रवज्रा जतजा स्ततो गौ' जिसमें जगण तगण जगण और दो गुरु हों उसे उपेन्द्रवज्रा कहते हैं । इन दोनों के मेल से उपजाति के १४ भेद हो जाते हैं । तथा च वृद्धा । एकत्र पादे चरणद्वये वा पादत्रये वान्यतरस्थितिश्चेत् । तयोरिहान्यत्र तदोहनीयाश्चतुर्दशोक्ता उपजातिभेदाः । —वृत्तरत्नाकरस्य नारायणी टीका ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अद्यापीत्यादि—अद्यापि इदानीमपि न केवलं तत्काले यस्याजितस्य भगवतः, कथंभूतस्य ? अजितशासनस्य अजितमनिराकृतं परवादिभिः शासनमनेकान्तमतं यस्य तस्य, कथंभूतस्य ? सतां प्रणेतुः सतां भव्यानां प्रणेतुः सन्मार्गे प्रवर्तकस्य नाम प्रगृह्यते उच्चार्यते, परमुत्कृष्टं पवित्रं सकलमलविलयकारणं, केन ? जनेन, कथंभूतेन ? स्वसिद्धिकामेन स्वस्य सिद्धिः पराभिभवेनात्मनोऽभिप्रेत-प्रयोजन-निष्पत्तिस्तत्र कामो यस्य तेनात्मजयाभिलाषिणेत्यर्थः, किमर्थं ? प्रतिमङ्गलार्थं प्रतिमङ्गलाय प्रतिमङ्गलार्थं मङ्गलं मङ्गलं प्रति सिद्धिनिमित्तमित्यर्थः। क्व ? लोके।

इसलिये इष्टसिद्धि के अर्थ भव्यजन अब भी उनके नाम का उच्चारण करते हैं यह कहते हैं—

अन्वयार्थ—(अजितशासनस्य) परवादियों के द्वारा अविजित अनेकान्तमत से युक्त तथा (सतां प्रणेतुः) सत्पुरुषों के प्रधान नायक (यस्य) जिन अजितनाथ भगवान् का (परं पवित्रं) अत्यन्त पवित्र (नाम) नाम (अद्यापि) आज भी (स्वसिद्धिकामेन) अपने मनोरथों की सिद्धि के इच्छुक (जनेन) जन समूह के द्वारा (प्रतिमङ्गलार्थम्) प्रत्येक मंगल के लिये (प्रगृह्यते) सादर ग्रहण किया जाता है।

भावार्थ—भगवान् अजितनाथ का अनेकान्तमत रूप शासन सर्वथा एकान्तवादियों के द्वारा सदा अविजित रहता था और वे भव्य पुरुषों के प्रधान नेता थे—स्वयं समीचीन मार्ग पर चल कर उन्हें समीचीन मार्ग में—मोक्षपथ में चलाने वाले थे इसलिये उनका लोकोत्तर माहात्म्य न केवल उस समय था किन्तु आज भी वैसा ही माहात्म्य बना हुआ है इसीलिये अपने मनोरथों की सिद्धि चाहने वाले मनुष्य आज भी प्रत्येक मंगल के निमित्त उनके पवित्र नाम का उच्चारण बड़ी श्रद्धा के साथ किया करते हैं ॥ २ ॥

यस्य[1] भगवतो नाम गृह्यते स किमर्थं प्रतिबन्धकप्रक्षपं कृत्वा सर्वज्ञः प्रादुर्भूत इत्याह—

यः प्रादुरासीत्प्रभुशक्तिभूम्ना भव्याशयालीनकलङ्कशान्त्यै।
महामुनिर्मुक्तघनोपदेहो यथारविन्दाभ्युदयाय भास्वान् ॥ ३ ॥

यः प्रादुरासीदित्यादि—यो भगवान् प्रादुरासीत् प्रादुर्भूतवान्, किमर्थं ? भव्याशयालीनकलङ्कशान्त्यै भव्यानामाशयः चित्तं चिद्रूपमात्मस्वरूपं तत्रालीनो लग्नः सचासौ कलङ्कश्च अज्ञानं तत्कारणं ज्ञानावरणादिकर्म च तस्य शान्त्यै विनाशाय भव्यप्रतिबोधनायेत्यर्थः। केन ? प्रभुशक्तिभूम्ना प्रभवति समर्थो भवत्युपकारं कर्तुमिति प्रभुर्जगतामुपकारको भगवान् तस्य शक्तिर्वाणी यया तेषामुपकारं कर्तुं शक्नोति तस्या भूमा जीवाद्यर्थप्ररूपणेमाहात्म्यविशेषः प्राचुर्यं वा तेन, कथंभूतोऽसौ ? महामुनिः गणधरदेवादिमुनीनां प्रधानः प्रत्यक्षज्ञानी वा, क इव कस्मै प्रादुरासीदित्याह—मुक्त इत्यादि, यथा भास्वानादित्यः प्रादुरासीत् किमर्थं ? अरविन्दाभ्युदयाय अरविन्दानां पद्मानामभ्युदयो विकासलक्षणा विभूतिस्तस्मै, किंविशिष्टो भास्वान् ? मुक्तघनोपदेहः घनैर्मेघैरुपदेह उपलेपः प्रच्छादनं यस्य ॥ ३ ॥

---

१. यस्य इतोग्रे मङ्गलवतः ख.।

२

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जिन भगवान् का नाम लिया जाता है वे किस प्रकार प्रतिबन्धकों का क्षय करके सर्वज्ञ हुए थे यह कहते हैं—

अन्वयार्थं—(मुक्तघनोपदेहः) ज्ञानावरणादि कर्म रूप सघन आवरण से रहित (यः) जो (महामुनिः) गणधरादि देवों में प्रधान अथवा प्रत्यक्षज्ञानी अजितनाथ भगवान् (भव्याशयालीन-कलङ्कशान्त्यै) भव्यजनों के हृदय में संलग्न अज्ञान अथवा उसके कारणभूत ज्ञानावरणादिकर्म रूप कलङ्क की शान्ति के लिये (प्रभुशक्तिभूम्ना) जगत् का उपकार करने में समर्थ वाणी के माहात्म्य विशेष अथवा प्रभुत्वशक्ति की प्रचुरता से ('तथा' प्रादुरासीत्) उस तरह प्रकट हुए थे (यथा) जिस तरह कि (मुक्तघनोपदेहः) मेघरूप आच्छादन से मुक्त सूर्य (अरविन्दाभ्युदयाय) कमलों के विकास रूप अभ्युदय के लिये प्रकट होता है।

भावार्थ—भगवान् अजितनाथ गणधरादि मुनियों में प्रधान होने के कारण अथवा प्रत्यक्ष ज्ञान से युक्त होने के कारण महामुनि कहलाते थे। जिस प्रकार सूर्य मेघों के आवरण को चीर कर अपने प्रखर प्रताप से कमलों के आह्लाद का कारण होता है उसी प्रकार भगवान् अजितनाथ भी घातिया कर्म रूप आवरण को छिन्न-भिन्न कर केवलज्ञान से युक्त हो अपनी लोकोपकारक दिव्यध्वनि की महिमा से भव्यजीवों के हृदय में विद्यमान अज्ञानान्धकार को दूर करने वाले हुए थे॥ ३॥

तदर्थं प्रादुर्भूतेन च तेन किं कृतमित्याह—

येन प्रणीतं पृथुधर्मतीर्थं [1]ज्येष्ठं जनाः प्राप्य जयन्ति दुःखम्।
गाङ्गं ह्रदं चन्दनपङ्कशीतं गजप्रवेका इव धर्मतप्ताः॥ ४॥

येनेत्यादि—येनाजितनाम्ना तीर्थंकरदेवेन प्रणीतं प्रकाशितं किं? धर्मतीर्थं धर्मस्योत्तम-क्षमादिलक्षणस्य चारित्रलक्षणस्य च प्रतिपादकं तीर्थं श्रुतं, कथंभूतं? पृथु महत् सकलपदार्थ-विषयतया ज्येष्ठं सकलधर्मतीर्थप्रधानं पुनरपि कथंभूतं जनाः प्राप्य जयन्ति दुःखं यदित्यध्याहार्यं यद्धर्मतीर्थं प्राप्य लब्ध्वा जनाः भव्याः जयन्ति निराकुर्वन्ति दुःखं संसारपरिभ्रमणक्लेशं, किमिव कथंभूतं के? इत्याह—गाङ्गमित्यादि-गङ्गाया अयं गाङ्गो ह्रदस्तं, कथंभूतं? चन्दनपङ्कशीतं चन्दनस्य पङ्को जलकर्दमस्तस्य शीतमिव शीतं यस्य तं प्राप्य गजप्रवेका इव गजानां प्रवेकाः प्रवराः यथा घर्मेण तप्ता घर्मतप्ताः जयन्ति दुःखमिति॥ ४॥

उत्पन्न हुए भगवान् ने क्या किया यह कहते हैं—

अन्वयार्थं—(येन) जिन अजितनाथ भगवान् के द्वारा (प्रणीतं) प्रकाशित (पृथु) अत्यन्त विस्तृत एवं (ज्येष्ठं) श्रेष्ठ (धर्मतीर्थं) धर्मरूपी तीर्थ अथवा धर्म के प्रतिपादक श्रुत को (प्राप्य) पाकर (जनाः) भव्यजीव (दुःखं) संसार परिभ्रमण रूप क्लेश को उस तरह (जयन्ति) जीत लेते हैं जिस तरह कि (घर्मतप्ताः) सूर्य के आताप से पीड़ित (गजप्रवेकाः) बड़े-बड़े हाथी

१. अतिशयेन प्रशस्यं ज्येष्ठ, 'प्रशस्य श्रा' इति श्रा आदेशे श्रेष्ठ 'ज्या च' इति ज्या आदेशे ज्येष्ठं भवति।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(चन्दनपङ्क शीतं) चन्दन के द्रव के समान शीतल (गाङ्गं ह्रदं) गङ्गा नदी के द्रह-अगाध जल को पाकर सूर्य के संताप से उत्पन्न दुःख को जीत लेते हैं।

भावार्थ—उत्तम क्षमा आदि दशलक्षण धर्म रूप आत्मा की परिणति अथवा चारित्र को धर्म कहते हैं इस धर्म का प्रतिपादन करने वाला परमागम तीर्थ कहलाता है। भगवान अजितनाथ ने अपनी दिव्यध्वनि के द्वारा जिस परमागम रूप धर्म तीर्थ का प्रकाश किया था वह द्वादशाङ्ग में विस्तृत होने के कारण अत्यन्त महान् है और समस्त धर्मतीर्थों में प्रधान होने के कारण अत्यन्त श्रेष्ठ है। इस परमागम की शरण पाकर भव्य जीव चतुर्गति के परिभ्रमणजन्य क्लेश से उस तरह छूट जाते हैं जिस तरह कि घाम से पीड़ित हाथी गङ्गा नदी के अत्यन्त शीतल अगाध जल को पाकर गर्मी के दुःख से छूट जाते हैं ॥ ४ ॥

ननु किं फलमुद्दिश्य भगवता धर्मतीर्थं प्रणीतमित्याह—

स ब्रह्मनिष्ठः सममित्रशत्रु-विद्याविनिर्वान्तकषायदोषः ।
लब्धात्मलक्ष्मीरजितोऽजितात्मा जिनश्रियं मे भगवन् विधत्ताम् ॥ ५ ॥

स ब्रह्मनिष्ठ इत्यादि—सोऽजितो भगवान् ब्रह्मनिष्ठः ब्रह्मणि सकलदोषरहिते परमात्म-स्वरूपे निष्ठा परिसमाप्तिर्यस्य, अतो न किञ्चित् तत्प्रणयने फलमसावपेक्षते कृतकृत्यत्वात् केवलं परार्थैवास्य प्रवृत्तिः। अतएव सममित्रशत्रुः मित्राणि च शत्रवश्च मित्रशत्रवस्ते समा यस्य, कथमसौ ब्रह्मनिष्ठः कथं वा सममित्रशत्रुरित्याह–विद्येत्यादिविद्यया परमागमज्ञानं तदर्थानुष्ठानलक्षणया विशेषेण निर्वान्ताः सुत्यक्ताः कषाया द्रव्यक्रोधादयो दोषा भावक्रोधादयोवायेन निराकृतद्रव्यभाव-रूपघातिकर्ममलकलङ्क इत्यर्थः। यत एवंविधोऽसौ ततो ब्रह्मनिष्ठः सममित्रशत्रुश्च भवति। भवतु तथाविधोऽसौ तन्निष्ठस्तथापि तदा चैतन्यमात्रस्वरूपः किञ्चिज्ज्ञो वा भविष्यति अतः कथं धर्म-तीर्थं प्रणीतवानित्याह–लब्धात्मलक्ष्मीरिति–आत्मनो लक्ष्मीरनन्तज्ञानादिलक्षणा लब्धा प्राप्ता सा येनासौ लब्धात्म लक्ष्मीः, 'समासान्तो विधिरनित्य' इति वचनात् 'ऋन्मोः' इति कः प्रत्ययो न भवति इत्थंभूतः अजितः अन्तरङ्गैर्बाह्यैश्च शत्रुभिर्न जीयत इत्यजितः, जितात्मा जित आत्मा येनासौ जितात्मा आत्मवान् इत्यर्थः इन्द्रियाधीनो न भवतीति यावत्। भगवान् विशिष्ट-ज्ञानवान् पूज्यो वा विधत्ताम् करोतु, कां? जिनश्रियं जिनस्य श्रीरनन्तज्ञानादिविभूतिस्तां मे मह्यम् ॥ ५ ॥

किस फल का लक्ष्य कर भगवान् ने धर्मतीर्थ की प्रवृत्ति की यह कहते हैं—

अन्वयार्थ—(विद्याविनिर्वान्ति-कषाय-दोषः) जिन्होंने परमागम के ज्ञान और उसमें प्रति-पादित मोक्षमार्ग के अनुष्ठान रूप विद्या के द्वारा कषायरूपी दोषों को अथवा द्रव्यक्रोधादिरूप कषाय और भावक्रोधादि रूप दोषों को बिल्कुल नष्ट कर दिया है, जो (ब्रह्मनिष्ठः) शुद्ध आत्म-स्वरूप में स्थित हैं, (सममित्रशत्रुः) जिन्हें मित्र और शत्रु समान हैं, (लब्धात्मलक्ष्मीः) जो आत्मा की अनन्त ज्ञानादिरूप लक्ष्मी को प्राप्त कर चुके हैं और (जितात्मा) जिन्होंने अपने आप को जीत लिया है अर्थात् जो इन्द्रियों के आधीन नहीं है (सः) वे (अजितः भगवान्)

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अन्तरङ्ग बहिरङ्ग शत्रुओं के द्वारा अपराजित अजितनाथ भगवान् (मह्यम्) मेरे लिये (जिन-श्रियम्) आर्हन्त्यलक्ष्मी—अनन्त ज्ञानादि विभूति (विधताम्) प्रदान करें।

भावार्थ—सम्यग्ज्ञान और तदनुरूप आचरण से जिनके क्रोधादि कषाय नष्ट हो गये हैं तथा इसके फलस्वरूप जिनका उपयोग बाह्य पदार्थों में न जाकर शुद्ध आत्म स्वरूप में लग रहा है। क्रोधादि कषायों के नष्ट हो जाने से जिन्हें शत्रु और मित्र समान प्रतिभासित होने लगे हैं, जिन्हें राग द्वेष से रहित शुद्ध आत्मलक्ष्मी-अनन्तज्ञान, अनन्तदर्शन, अनन्तसुख एवं अनन्तवीर्य की प्राप्ति हो चुकी है तथा कषाय के नष्ट हो जाने से जिनका विषयानुराग समाप्त हो गया है इसीलिये विषयों में प्रवर्तक इन्द्रियाँ जिन्हें अपने आधीन नहीं कर सकी हैं वे उत्कृष्ट ज्ञान अथवा अचिन्त्य ऐश्वर्य के धारक अजितनाथ तीर्थंकर मेरे लिये जिनलक्ष्मी—अनन्तचतुष्टय रूप विभूति प्रदान करें ॥ ५ ॥

इत्यजितजिनस्तवनम्

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(३) श्री शम्भवजिनस्तवनम्

त्वं शम्भवः संभवतर्षरोगैः संतप्यमानस्य जनस्य लोके।
आसीरिहाकस्मिक एव वैद्यो वैद्यो यथाऽनाथरुजां प्रशान्त्यै ॥ १ ॥

त्वं शम्भवेत्यादि—[१]इन्द्रवज्राछन्दः। समन्तभद्रस्वामी तृतीयतीर्थंकरदेवं चेतसि प्रत्यक्षरूपतया व्यवस्थाप्य त्वमित्याद्याह। शम्भव इत्यन्वर्था संज्ञेयम्, शं सुखं भवत्यस्माद्भव्यानामिति शंभवः। एतदेव दर्शयन्नाह–संभवेत्यादि–सं सुखं भवति येभ्यस्ते सम्भवाः स्रग्वनितादयः, यदि वा संगतोऽत्रुट्यद्रूपो भवः प्रादुर्भावो यत्रासौ सम्भवः संसारस्तत्र तर्षास्तृष्णास्ता एव रोगा दुःख हेतुत्वात् तै संतप्यमानस्य पीड्यमानस्य जनस्य प्राणिगणस्य आसीरभूर्वैद्यः। क्व ? इह लोके इह जगति। कथंभूतः ? आकस्मिक एव तत्फल निरपेक्ष एव। अत्र दृष्टान्तमाह-वैद्यो यथेत्यादि-वैद्यश्चिकित्सकः यथा येन फलानपेक्षप्रकारेण अनाथरुजां अनाथा अशरणा द्रव्यसहायहीनास्तेषां रुजो व्याधयस्तासां प्रशान्त्यै उपशमनाय आकस्मिक एव वैद्योऽभूत् तथा त्वमप्यासीः ॥ १ ॥

भगवान् के शंभव नामकी सार्थकता बतलाते हुए कहते हैं—

अन्वयार्थ—हे भगवन् ! (त्वं शंभवः) आप से भव्य जीवों को सुख प्राप्त होता है इसलिये आप 'शंभव' इस सार्थक नाम को धारण करने वाले हैं। आप (इह लोके) इस संसार में (संभवतर्षरोगैः) सांसारिक भोग तृष्णा रूप रोगों से (संतप्यमानस्य) अतिशय पीडित (जनस्य) जन समूह के लिये (तथा) उस तरह (आकस्मिक एव) फल की अपेक्षा से रहित (वैद्यः) वैद्य (आसीः) हुए थे (यथा) जिस तरह कि (अनाथरुजाम्) अशरण मनुष्यों के रोगों की (प्रशान्त्यै) शान्ति के लिये (वैद्यः) धनादि की इच्छा से रहित वैद्य होता है।

भावार्थ—हे भगवन् ! इस संसार के भीतर प्राणी भोगोपभोगों की तृष्णा रूपी रोगों से अत्यन्त दुःखी हो रहे हैं उन सबका दुःख दूर करने के लिये आप प्रतिफल की इच्छा से रहित एक उत्तम वैद्य के समान प्रकट हुए थे। जिस प्रकार द्रव्य तथा सहायकों से रहित अनाथ मनुष्यों के रोगों को प्रशान्त करने के लिये कोई कृपालु निःस्पृह वैद्य प्रकट होता है उसी प्रकार आप भी प्रकट हुए थे अतः आपका 'शंभव' यह नाम अत्यन्त सार्थक है ॥ १ ॥

यस्य जगतो भगवानाकस्मिको वैद्यः सम्पन्नस्तत्कीदृशमित्याह—

अनित्यमत्राणमहंक्रियाभिः प्रसक्तमिथ्याध्यवसायदोषम्।
इदं जगज्जन्मजरान्तकार्तं निरंजनां शान्तिमजीगमस्त्वम् ॥ २ ॥

अनित्यमित्यादि—[२]उपेन्द्रवज्राछन्दः इदं। प्रतीयमानं जगत्प्राणिसंघातः, कथंभूतम् ? अनित्यं विनश्वरम्, अनेन सर्वमाविर्भावतिरोभाववदिति सांख्यमतं प्रत्युक्तम्। पुनरपि कथंभूतम् ?

---

१. 'स्यादिन्द्रवज्रा यदि तौ जगौ गः, जिसके प्रत्येक चरण में तगण, तगण, जगण, गुरु और गुरु इस प्रकार ग्यारह अक्षर हों उसे इन्द्रवज्रा कहते हैं।

२. 'उपेन्द्रवज्रा जतजास्ततो गौ' जिसके प्रत्येक चरण में जगण, तगण, जगण और दो गुरु हों उसे उपेन्द्रवज्रा कहते हैं।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अत्राणं न विद्यते त्राणं रक्षणमस्येत्यत्राणमशरणमित्यर्थः, अनेनेश्वरो वा विष्णुर्वा तस्य त्रातेति यौगमीमांसकमतं निरस्तम्। कथं तदत्राणमित्याह–अहंक्रियाभिरित्यादि–अहमस्य सर्वस्य स्त्र्यादि-विषयस्य स्वामीतिक्रियाः अहंक्रियास्ताभिः, प्रसक्तः संलग्नः प्रवृत्तो वा मिथ्या असत्योऽध्यवसायोऽभिनिवेशः स एव दोषो यस्य तत्तथोक्तं। अतएव जन्मजरान्तकार्तं तत् जन्म प्रादुर्भावो जरा वृद्धत्वं अन्तको मरणं तैरार्तं पीडितं तदित्थंभूतं जगत् किं कृतवान् भवानित्याह-निरञ्जनामित्यादि— शान्ति परमकल्याणं अजीगमस्त्वं इदं जगत्प्रापितवांस्त्वम्। कथंभूतां ? निरञ्जनां अञ्जनात्कर्ममंमलान्निष्क्रान्तं तद्वा निष्क्रान्तं यस्याः सा निरञ्जनाता मुक्तिरूपामित्यर्थः ॥ २ ॥

जिस संसार के भगवान् आकस्मिक वैद्य हुए वह कैसा है यह बतलाते हैं—

अन्वयार्थ—हे भगवन्! (अनित्यम्) विनश्वर (अत्राणम्) रक्षकरहित, (अहंक्रियाभिः) 'मैं' ही सब पदार्थों का कर्त्ता धर्त्ता हूँ' इस प्रकार अहंकार ममकार की क्रियाओं से संलग्न मिथ्या-अभिनिवेशरूप दोष से दूषित तथा (जन्मजरान्तकार्त्तं) जन्म बुढ़ापा और मृत्यु से पीडित (इदं जगत्) इस जगत् को (त्वम्) आपने (निरञ्जनां) कर्म-कलङ्क से रहित मुक्ति रूप (शान्ति) शान्ति को (अजीगमः) प्राप्त कराया है।

भावार्थ—यह संसार विनाशीक है, रक्षक से रहित है, मिथ्या अभिप्राय के कारण वाह्य-पदार्थों का कर्त्ता धर्त्ता बन कर दुःखी हो रहा हैं तथा इसके फलस्वरूप जन्म-जरा और मरण रूप दुःख से निरन्तर पीड़ित हो रहा है। हे भगवन्! जिस कारण विपिन्न संसार को आपने कर्ममल कलंक से रहित अविनाशी मोक्षरूपी शान्ति का स्वरूप बता कर उसे सुख सम्पन्न किया है इसलिए आप आकस्मिक वैद्य हैं ॥ २ ॥

अपरं च किं कृतवांस्त्वमित्याह—

शतह्रदोन्मेषचलं हि सौख्यं तृष्णामयाप्यायनमात्रहेतुः ।
तृष्णाभिवृद्धिश्च तपत्यजस्रं तापस्तदायासयतीत्यवादीः ॥ ३ ॥

शतह्रदोन्मेषेत्यादि—उपजातिच्छन्दः। शतह्रदा विद्युत् तस्या उन्मेष उन्मीलनं स इव चलंअस्थिरं इन्द्रियसुखं। कथंभूतं तदित्याह—तृष्णेत्यादि–तृष्णा संसारसुखाभिलाषः सैव आमयो व्याधिःतस्याप्यायनमात्रं पुष्टिमात्रं तस्य हेतुः। तत्पुष्टिश्च किं करोतीत्याह तृष्णाभिवृद्धिश्च तपत्य-जस्रं। तृष्णाया अभिवृद्धिः पुष्टिः तपति संतापयति अजस्रं अनवरतं तज्जनिततापो जगतः किं करोति, तदाह–ताप इत्यादि। तापस्तज्जगदायासयति अनेकदुःखपरम्परया क्लेशयति। सेवादि-क्रियासु वा प्रवर्तयति इति एवं जगतः संबोधनार्थं त्वमेव आवादीः।

इसके सिवाय आपने क्या किया यह कहते हैं—

अन्वयार्थ—(हि) निश्चय से (सौख्यं) इन्द्रियजन्य सुख (शतह्रदोन्मेषचलं) बिजली की कोंद के समान चञ्चल है तथा (तृष्णामयाप्यायनमात्रहेतुः) तृष्णा रूपी रोग की पुष्टि मात्र का कारण है। (च) और (तृष्णाभिवृद्धिः) तृष्णा की चौमुखी वृद्धि (अजस्रं) निरन्तर (तपति)

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ताप उत्पन्न करती है, एवं वह (तापः) ताप (तत्) जगत् को (आयासयति) क्लेशों की परम्परा द्वारा दुःखी करता है ......(इति अवादीः) ऐसा आपने कहा था ।

भावार्थ—संसार के प्राणी जिस इन्द्रियजन्य सुख के पीछे पड़ रहे हैं वह सुख बिजली की चमक के समान क्षणभंगुर है, तृष्णारूपी रोगों को वढ़ाने वाला है, तृष्णा की वृद्धि निरन्तर संताप—आकुलता को बढ़ांती रहती है और वह संताप प्राणियों को सेवा कृषि आदि कार्यों में संलग्न कर दुःखी करता रहता है इस तरह दुःख का यथार्थ निदान शंभवनाथ भगवान् ने संसार के प्राणियों को बताया था ॥ ३ ॥

ननु सुगतादिभिरपि तत्सम्बोधनार्थं बन्धाद्युपदेशः कृतोऽतस्त्वमेवावादीरित्ययुक्तमिति चेत् ? तन्न तन्मते बन्धमोक्षादेरेवासभवात् । एतदेवाह—

बन्धश्च मोक्षश्च तयोश्च हेतू बद्धश्च मुक्तश्च फलं च मुक्तेः ।
स्याद्वादिनो नाथ तवैव युक्तं नैकान्तदृष्टेस्त्वमतोऽसि शास्ता ॥ ४ ॥

बन्धश्चेत्यादि—इन्द्रवज्राच्छन्दः । जीवस्य कर्मणा संश्लेषो वन्धः, विश्लेषो मोक्षः चकारः परस्परसमुच्चये तयोर्बन्धमोक्षयोर्हेतू च, बन्धस्य हेतु मिथ्यात्वादिमोक्षस्य हेतुः सम्यग्दर्शनादिः । न केवलमेतत्किन्त्वन्यदपि, बद्धश्च मुक्तश्च फलं च मुक्तेः-य एव पूर्वं बद्धः स एव पश्चात् मुक्तः, तस्यैव च मुक्तेः फलमनन्तज्ञानादिलक्षणसंपन्नमित्येतत्सर्वं तवैव शंभवस्यैव कथंभूतस्य ! स्याद्वादिनोऽनेकान्तवादिनो मते युक्तमुपपन्नं नैकान्तदृष्टेः सुगतादेर्मते । नहि क्षणिकैकान्तवादिनो मतेन तत् घटते तत्र हि अन्यो बद्धोऽन्यश्च मुच्यते क्षणिकत्वात्, अन्यस्य वन्धकारणानुष्ठानमन्यस्य च बन्धः, अन्यस्य मुक्तिकारणानुष्ठानमन्यस्य च मुक्तिरिति । नापि नित्यैकान्तवादिनो मते एतद् घटते तत्र हि यदि बद्धस्तदा बद्ध एव स्यादात्मा न मुक्तः, अथ मुक्तस्तदा मुक्त एव स्यान्न बद्धः सर्वथैक रूपत्वात् अन्यथा नित्यैकान्त विरोधः अतः सर्वथैकान्तवादिमते बन्धमोक्षादेरनुपपत्तेः । हे नाथ स्वामिन् ! त्वमेव असि भवसि शास्ता तत्त्वोपदेष्टा ॥ ४ ॥

आगे बन्ध मोक्ष की व्यवस्था आपके ही मन में बनती है सुगत आदि के मन में नहीं यह कहते हैं—

अन्वयार्थ—(हे नाथ) हे स्वामिन् (बन्धश्च) बन्ध, (मोक्षश्च) मोक्ष (तयोर्हेतू च) बन्ध और मोक्ष के हेतु (बद्धश्च) बद्ध आत्मा (मुक्तश्च) मुक्त आत्मा (च) और (मुक्तेः) मुक्ति का (फलं) फल.... यह सब (स्याद्वादिनः) अनेकान्तमत से निरूपण करने वाले (तवैव) आपके ही (मते) मत में (युक्तं) ठीक होता है । (एकान्तदृष्टेः न) एकान्तदृष्टि रखने वाले बौद्ध अथवा सांख्य आदि के मत में ठीक नहीं होता (अतः) इसलिये (त्वम्) आप ही (शास्ता) तत्त्वोपदेष्टा हैं ।

भावार्थ—जीव का कर्मों के साथ जो एकक्षेत्रावगाह रूप सम्बन्ध है वह बन्ध कहलाता है । जीव का कर्म के साथ एकक्षेत्रावगाह सम्बन्ध का छूट जाना मोक्ष कहा जाता है । मिथ्यादर्शन आदि विकारी भाव बन्ध के कारण हैं । सम्यग्दर्शन आदि आत्मीयगुण मोक्ष के कारण हैं । कर्मपिण्ड

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

से युक्त आत्मा बद्ध है। कर्म-पिण्ड से रहित आत्मा मुक्त है तथा अनन्तज्ञान आदि आठ गुणों का प्रकट हो जाना मुक्ति का फल है इन सब की व्यवस्था हे शंभव जिनेन्द्र ! आपके ही मत में बनती है क्योंकि आप स्याद्वादी हैं—अनेकान्त की दृष्टि से पदार्थ का निरूपण करते हैं। आत्मा द्रव्यार्थिक नय की अपेक्षा नित्य है और पर्यायार्थिक नय की अपेक्षा अनित्य है इसलिये द्रव्यार्थिक नय की अपेक्षा यह बात संगत हो जाती है कि जिस आत्मा ने पहले कर्मबन्ध किया था वही आत्मा सम्यग्दर्शनादि अन्तरङ्ग और तपश्चरण आदि बहिरङ्ग कारण के मिलने पर मुक्त हो जाता है। तथा पर्यायार्थिक नयकी अपेक्षा आत्मा की बद्ध और मुक्त दशा संगत हो जाती है। बौद्ध आत्मा को सर्वथा क्षणिक मानते हैं इसलिये उनके मत में बन्ध किसी का होता है तो मोक्ष किसी दूसरे का होता है क्योंकि बन्ध करने वाला आत्मा सर्वथा क्षणिक होने से बन्ध करते ही नष्ट हो जाता है अतः मोक्ष किसी दूसरे का होता है। सांख्य मत वाले आत्मा को सर्वथा नित्य मानते हैं इसलिये उनके मतानुसार जो आत्मा बद्ध है वह बद्ध ही रहेगा और जो मुक्त है वह मुक्त ही रहेगा क्योंकि एक ही आत्मा की क्रम से बद्ध और मुक्त दशा मानने परमात्मा में अनित्यता आ जाने से सर्वथा नित्य का सिद्धान्त खण्डित हो जाता है। योग दर्शन—नैयायिक मतवाले मानते हैं कि मुक्ति में बुद्धि, सुख, दुःख, इच्छा, द्वेष, प्रयत्न, संस्कार आदि विशिष्ट गुणों का सर्वथा अभाव हो जाता है जब कि आपका कथन है कि जिस पदार्थ का जो गुण है उसका सर्वथा नाश नहीं हो सकता अतः मुक्ति अवस्था में बुद्धि एवं सुख आदि का सर्वथा नाश नहीं होता किन्तु बुद्धि अर्थात् ज्ञानगुण की जो क्षायोपशमिक अवस्था थी वह नष्ट होकर क्षायिक अवस्था हो जाती है। इसी तरह सुख की जो विषयजन्य अवस्था थी वह नष्ट होकर अव्याबाध सुखरूप अवस्था हो जाती है। इसी तरह अन्य गुणों में समझना चाहिये। इस प्रकार मुक्ति का फल अनन्तज्ञानादि गुणों का प्रकट होना है। यह सब व्यवस्था आपके ही मत से ठीक बैठती है इसलिये यथार्थ उपदेष्टा आप ही हैं ॥ ४ ॥

स्तोता स्वात्मनः औद्धत्यं परिहरन्नाह—

शक्रोऽप्यशक्तस्तव पुण्यकीर्तेः स्तुत्यो प्रवृत्तः किमु मादृशोऽज्ञः ।
तथापि भक्त्या स्तुतपादपद्मो ममार्य देयाः शिवतातिमुच्चैः ॥ ५ ॥

शक्रोऽपीत्यादि—उपजातिच्छन्दः। शक्रः इन्द्रः सोऽपि अवधिज्ञानसंपन्नः सकलश्रुतधरोऽप्यशक्तोऽसमर्थः। कथंभूतः ? स्तुत्यां स्तवने प्रवृत्तः सन्, कस्य ? तव शंभवतीर्थंकरदेवस्य, कथंभूतस्य ? पुण्यकीर्तेः पुण्या प्रशस्ता निर्मला कीर्तिः ख्यातिः वाणी वा 'कीर्त्यन्ते प्रतिपाद्यन्ते जीवाद्यर्था ययेति' व्युत्पत्तेः, पुण्याय पुण्यनिमित्तं वा कीर्तिः कीर्तनं स्तुतिर्यस्य तस्य। किमु पुनः मादृशो मनुष्यमात्रोऽज्ञो बुद्ध्यादिविशिष्टज्ञानविकलः शक्तो भविष्यति। तथापि अशक्तेनापि मया भक्त्यनुरागेण स्तुतपादपद्मः पादावेवपद्मौ पादपद्मौ स्तुतौ पादपद्मौ यस्य। गुणैर्गुणवद्भिर्वा अर्यते समाश्रीयते इत्यार्यः तस्य सम्बोधनं हे आर्य ! मम स्तावकस्य देयाः दद्यास्त्वं भगवान् कां ? शिवतातिं, तायृ सन्तानपालनयोः तायनं तातिः शिवस्य सौख्यस्य तातिः संतानः शिवतातिस्तामुच्चैः परमातिशयप्राप्तां मोक्षसौख्यसन्ततिरूपाम् ॥ ५ ॥

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आगे स्तुति कर्ता अपने गर्व का परिहार करते हैं—

अन्वयार्थ—(हे आर्य !) गुणों अथवा गुणवानों के द्वारा सेव्य हे शंभव जिनेन्द्र ! (पुण्य-कीर्तेः) पवित्र ख्याति, पवित्र वाणी अथवा पुण्यवर्धक स्तुति से युक्त (तव) आपकी (स्तुत्यां) स्तुति में (प्रवृत्तः) प्रवृत्त हुआ (शक्रःअपि) अवधिज्ञानी और समस्त श्रुत का धारक इन्द्र भी जब (अशक्तः) असमर्थ रहा है तब (मादृशः अज्ञः किमु) मेरे जैसा अज्ञानी पुरुष कैसे समर्थ हो सकता है ? यद्यपि यह बात है (तथापि) तो भी (भक्त्या) तीव्र अनुराग द्वारा (स्तुतपादपद्मः) स्तुत चरणकमलों से युक्त आप (मम) मेरे लिये (उच्चैः) उत्कृष्ट (शिवतातिम्) यथार्थ सुख की सन्तति को (देयाः) प्रदान करें ।

भावार्थ—हे भगवन् ! जब शक्ति का पुञ्ज अवधिज्ञानी इन्द्र भी आपकी स्तुति करने में समर्थ नहीं हो सका है तब मेरा जैसा अज्ञानी मानव कैसे समर्थ हो सकता है ? इस तरह असमर्थता की दशा में भी तीव्र अनुराग वश मैं आपके चरण कमलों की स्तुति कर रहा हूँ सो इसके फलस्वरूप आप मुझे उत्कृष्ट आत्मसुख की सन्तति प्रदान करें मुझे सांसारिक सुखों की चाह नहीं है ॥ ५ ॥

इति शंभवजिनस्तवनम्

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(४) श्री अभिनन्दनजिनस्तवनम्

गुणाभिनन्दादभिनन्दनो भवान् दयावधूं क्षान्तिसखीमशिश्रियत् ।
समाधिस्तन्त्रतदुपोपपत्तये द्वयेन नैर्ग्रन्थ्यगुणेन चायुजत् ॥ १ ॥

गुणाभिनन्दादित्यादि—[1]वंशस्थछन्दः। भवान् चतुर्थतीर्थंकरदेवोऽभिनन्दनोऽभिनन्दन-नामा, कस्मात्? गुणाभिनन्दात् गुणानामन्तरङ्गानन्तज्ञानादीनां बहिश्च सकललक्ष्म्यादीनामभि-नन्दोऽभिवृद्धिस्तस्मात्। उत्पन्ने हि भगवति सकलप्राणिनां ज्ञानादयः सकलसम्पदश्च वृद्धिगता इति इत्थमेतल्लब्धनामा भवान् किं कृतवान्? अशिश्रियत् समाश्रितवान्, कां? दयावधूं, दयैव वधूः प्रियतमा तां, कथंभूतां? क्षान्तिसखीं क्षान्तिः क्षमा सखी यस्यास्ताम्। अनेन सुगतस्य मातुरुदरं विपाट्य निर्गतस्य ईश्वरस्य च त्रिपुरदहनादौ प्रवृत्तस्य क्षान्तिदययोरभावादाप्तत्वं प्रत्याख्यातं। ततः किंविशिष्टोऽसौ सम्पन्नः? समाधितन्त्रः धर्म्यं शुक्लं च ध्याने समाधिः स तन्त्रः प्रधानं यस्य। यदि तत्तन्त्रोऽसौ तदा किमिति नैर्ग्रन्थ्ये कृतादर इत्याहतदित्यादि–तस्य समाधेरुपपत्तिर्घटना तस्यै च तदुपोपपत्तये 'प्रोपोत्समां पादपूरणे' इति द्वित्वम्। अयुजत् युक्तः। केन? नैर्ग्रन्थ्यगुणेन, कथंभूतेन? द्वयेन बाह्याभ्यन्तरपरिग्रह–परित्यागरूपेण। अनेन श्वेतपठाः प्रत्युक्ताः परिग्रहवता-मेकाग्रतालक्षणध्यानानुपपत्तेः परिग्रहस्य व्यग्रता हेतुत्वग्रहात् ॥ १ ॥

भगवान के अभिनन्दन नाम की सार्थकता कहते हैं—

अन्वयार्थ—हे भगवन्! (गुणाभिनन्दात्) अनन्तज्ञानादि अन्तरङ्ग और सकल लक्ष्मी आदि वहिरङ्ग गुणों की वृद्धि होने से (अभिनन्दन) अभिनन्दन इस सार्थक नाम को धारण करने वाले (भवान्) आपने (क्षान्तिसखीं) क्षमारूप सखी से सहित (दयावधूम्) दया रूप स्त्री का (अशिश्रियत्) आश्रय लिया था तथा (समाधितन्त्रः) धर्म्यध्यान और शुक्लध्यान रूप समाधि को प्रधान लक्ष्य बना कर (तदुपोपपत्तये) उसकी सिद्धि के लिये आप (द्वयेन) अन्तरङ्ग और बहिरङ्ग के भेद से दोनों प्रकार के (नैर्ग्रन्थ्यगुणेन) निष्परिग्रहता रूप गुण से (अयुजत्) युक्त हुए थे।

भावार्थ—भगवान् अभिनन्दन नाथ के उत्पन्न होते ही समस्त प्राणियों के ज्ञान आदि गुण तथा सम्पदाएँ वृद्धि को प्राप्त हुई थीं इसलिये उनका अभिन्दन नाम सार्थक था। दूसरे जीवों का दुःख दूर करने का शुभरागमिश्रित जो भाव है उसे दया कहते हैं तथा क्रोधादि कषायों के अभाव में प्रकट होने वाली आत्मा की जो शान्ति रूप परिणति है उसे क्षान्ति या क्षमा कहते हैं। '[2]रागादि भावों का उत्पन्न नहीं होना अहिंसा है' इस लक्षण के अनुसार इस क्षमा को अहिंसा कह सकते हैं इस तरह भगवान् ने दया और क्षमा दोनों को अपनाया था। अर्थात् प्रारम्भ में अपायविचय नामक धर्म्यध्यान में लीन होकर दया को आश्रय दिया था और पश्चात् शुक्लध्यान में लीन होकर क्षमारूप वीतराग परिणति को आश्रय दिया था। कर्मक्षय का साक्षात् कारण

---

१. 'जतौ तु वंशस्थमुदीरितं जरौ' जिसके प्रत्येक चरण में जगण, तगण, जगण और रगण इस प्रकार बारह अक्षर हों उसे वंशस्थ छन्द कहते हैं।

२. अप्रादुर्भावः खलु रागादीनां भवत्यहिंसेति।
तेषामेवोत्पत्तिर्हिंसेति जिनागमस्य संक्षेपः ॥—पुरुषार्थसिद्धयुपाय।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शुक्लध्यान है और उसकी प्राप्ति बिना निष्परिग्रह दशा के नहीं हो सकती क्योंकि परिग्रह व्यग्रता का कारण माना गया है इसीलिये उन्होंने बाह्य तथा आभ्यन्तर दोनों प्रकार के परिग्रह का त्याग कर पूर्णनिर्ग्रन्थता से अपने आपको युक्त किया था ॥ १ ॥

दयावधूं समाश्रित्य भगवान लोके किं कृतवानित्याह—

अचेतने तत्कृतबन्धजेऽपि च ममेदमित्याभिनिवेशिकग्रहात् ।
प्रभङ्गुरे स्थावरनिश्चयेन च क्षतं जगत्तत्त्वमजिग्रहद्भवान् ॥ २ ॥

अचेतन इत्यादि—जगत्तत्वमजिग्रहदिति सम्बन्धः । कथंभूतं जगत् ? क्षतं नष्टं कुत इत्याह- अचेतने इत्यादि, अचेतने शरीरे तत्कृतबन्धजेऽपि चेतनाचेतनेन शरीरेण सहायः कृतः कर्मवशादात्मनो बन्धस्तस्माज्जातं यत्सुखदुःखादि पुत्रकलत्रादि च तस्मिन्नपि सम्भावने च समुच्चये, तस्मिन् योऽसौ ममेदं शरीरादिकमहमस्य स्वामीत्यभिनिवेश स्तस्मिन् भव आभिनिवेशिकः सचासौ ग्रहश्च ग्रहणं तस्मात् क्षतं नष्टं जगत् प्राणिसंघातः, न केवलमेतस्मात् क्षतं नष्टं प्रभङ्गुरे कथञ्चिदनित्ये च स्थावरनिश्चयेन च नित्यत्वाध्य वसायेन च क्षतं जगत् । अतस्तत्वं यथावज्जीवादि स्वरूपं अजिग्रहद् ग्राहितवान्, भवानभिनन्दनस्वामी ॥ २ ॥

अब दयारूप वधू को प्राप्त कर भगवान् ने क्या किया यह कहते हैं—

अन्वयार्थ—(अचेतने) अचेतन शरीर में (च) और (तत्कृतबन्धजेऽपि) उस अचेतन शरीर के द्वारा किये हुए कर्मबन्ध से उत्पन्न सुख दुःखादिक तथा स्त्री पुत्रादि परपदार्थों में (ममेदम्) यह मेरा है मैं इसका स्वामी हूँ (इति) इस प्रकार के (आभिनिवेशिकग्रहात्) मिथ्या अभिप्राय को स्वीकार करने से अथवा मिथ्या अभिप्राय रूप पिशाच से (च) तथा (प्रभङ्गुरे) विनश्वर शरीर आदि पर पदार्थ में (स्थावर निश्चयेन) स्थायित्व के निश्चय से (क्षतं) नष्ट हुए (जगत्) जगत् को (भवान्) आपने (तत्त्वं) जीवादि पदार्थों का यथार्थ स्वरूप (अजिग्रहत्) ग्रहण कराया है—समझाया है ।

भावार्थ—यह शरीर पुद्गलकृत होने से अचेतन है, अचेतन शरीर की प्रवृत्तिरूप योग से होने वाला द्रव्य कर्मों का बन्ध अचेतन है और उस द्रव्य बन्ध के फलस्वरूप होनेवाला सुख दुःखादि तथा स्त्री पुत्रादि में जो राग भाव है वह निमित्त कारण की अपेक्षा अचेतन—चेतन से भिन्न है और उपादान कारण की अपेक्षा चेतन है । शरीर रूप नो-कर्म, द्रव्य बन्ध रूप द्रव्य कर्म और रागादि रूप भाव कर्म ये तीनों ही ज्ञानानन्द रूप आत्मस्वरूप से भिन्न पदार्थ हैं परन्तु अनादिकाल से लगे हुए मिथ्यात्व के प्रकोप से यह जीव उन्हें आत्मा समझ रहा है तथा इसी विपरीत अभिप्राय के कारण उन शरीरादि परपदार्थों की इष्ट-अनिष्ट परिणति से सुखी-दुःखी होता है । इसके सिवाय ये शरीरादिक पर पदार्थ भङ्गुर है—विनाशीक हैं परन्तु यह जगत् उन्हें नित्य समझ कर उन्हीं में आसक्त होकर आत्मा की सँभाल से दूर रहता है । हे अभिनन्दन जिनेन्द्र ! अपनी उपर्युक्त मिथ्याबुद्धि के कारण दुःखी होते हुए इस जगत् को आपने जीवादि पदार्थों का यथार्थ स्वरूप समझाया है । आपने उन्हें बताया है कि ज्ञानानन्द स्वरूप आत्मा ही तुम्हारा निज द्रव्य है उसे

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

छोड़ कर पर पदार्थों से ममता भाव को दूर करो तथा शरीरादिक पर पदार्थों को विनश्वर समझ कर उनकी ओर से आसक्ति को हटाओ तथा स्वरूप की ओर सुरुचि बढ़ाओ ॥ २ ॥

केन रूपेण तत्त्वमजिग्रहदित्याह—

क्षुदादिदुःखप्रतिकारतः स्थितिर्नचेन्द्रियार्थप्रभवाल्पसौख्यतः ।
ततो गुणो नास्ति च देहदेहिनोरितीदमित्थं भगवान् व्यजिज्ञपत् ॥ ३ ॥

क्षुदादीत्यादि—क्षुद्बुभुक्षा आदिर्यस्य पिपासादिस्तदेव दुःखं तस्माद्वा दुःखं तस्य प्रतिकारो भोजनादिना उपशमनं तृप्तिः सुखोत्पाद इत्यर्थः। तस्मात्ततः स्थितिः देहदेहिनोस्तृप्तिसुखसमन्वितयोः सर्वदा अवस्थानं न च नैव, कुतः ? पुनरपि क्षुदादि पीडोपलम्भात् तर्हि मनोज्ञरूपशब्दादिविषयप्रभवसुखात् तयोः सुखेनावस्थानं भविष्यतीत्याह—नचेत्यादि इन्द्रियाणि स्पर्शनादीनि अर्थास्तद्विषयाः स्पर्शादयस्तेभ्यः प्रभवत्युत्पद्यते इतीन्द्रियार्थप्रभवं तच्च तदल्पसौख्यं च सुखलवमात्रं तस्मात्ततः न च नैव स्थितिः सुखेनावस्थानं देहदेहिनोरिति सम्बन्धः। यत एवं ततः कारणाद्गुणोपकारो नास्ति च न विद्यते। एवं क्षुदादिप्रतिकारादिभ्यः, कयोर्देहदेहिनोः इति हेतोः। एवं इदं जगत् इत्थमनेन प्रकारेण भगवानभिनन्दनः तीर्थंकरदेवो व्यजिज्ञपत् ज्ञापितवान् ॥ ३ ॥

आगे आपने किस रूप से तत्त्व ग्रहण कराया यह कहते हैं—

अन्वयार्थ—(क्षुदादिदुःखप्रतिकारतः) क्षुधा-तृषा आदि के दुःख का प्रतिकार करने से भोजन पान ग्रहण करने से (च) और (इन्द्रियार्थप्रभवाल्पसौख्यतः) स्पर्शनादि इन्द्रियों के विषयों से उत्पन्न अल्प सुख से (देहदेहिनोः) शरीर और शरीर धारी आत्मा की (स्थितिः) सदा स्थिति नहीं रहती (ततः) इसलिये उनसे उनका कुछ (गुणः) उपकार (नास्ति) नहीं है (इत्थम्) इस तरह (इदम्) इस जगत् को (भगवान्) भगवान् अभिनन्दन जिनेन्द्र ने [इति] यह परमार्थ तत्त्व (व्यजिज्ञपत्) बतलाया है।

भावार्थ—संसार के प्राणी भूख-प्यास आदि के दुःखों से दुखी होकर रात-दिन भोजनपान में प्रवृत्त रहते हैं और सोचते हैं कि भोजनपान से शरीर स्थिर रहेगा तथा शरीर की स्थिरता से आत्मा भी स्थिर रहेगा परन्तु ऐसा होता नहीं है भोजनपान ग्रहण करते-करते शरीर नष्ट हो जाता है और शरीर के नष्ट होने से आत्मा अन्य पर्याय में चला जाता है। इसी प्रकार स्पर्शन आदि इन्द्रियों के स्पर्श आदि विषयों के सेवन से जो अल्प सुख होता है-क्षणिक तृप्ति होती है उससे भी शरीर और आत्मा को सदा स्थिति नहीं रहती। ये इन्द्रियजन्य सुख तृप्ति उत्पन्न न कर विषयाभिलाषा को पूर्व की अपेक्षा अधिक प्रदीप्त कर देते हैं इनसे शरीर और आत्मा को कोई लाभ नहीं है इसलिये इनसे राग घटा कर आत्मा स्वरूप की ओर ही दृष्टि देना चाहिये। हे अभिनन्दन जिनेन्द्र ? जगत् के जीवों को आपने यह यथार्थ तत्त्व समझाया है ॥ ३ ॥

इदं च परमकारुणिको जगदुपकारार्थं भगवानवादीदित्याह—

जनोऽतिलोलोऽप्यनुबन्धदोषतो भयादकार्येष्विह न प्रवर्तते ।
इहाप्यमुत्राप्यनुबन्धदोषवित् कथं सुखे संसजतीति चाब्रवीत् ॥ ४ ॥

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जनोतिलोल इत्यादि—जनो लोको अतिलोलोऽप्यतिविषयासक्तोऽपि अनुवन्धः आसक्तिः स एव दोषः ऐहिकपारत्रिकापायहेतुत्वात्तस्मादनुबन्धदोषतः परमासक्तिवशादपि अकार्येषु अकृत्येषु परस्त्रीगमनादिषु इह लोके न प्रवर्तते, कस्मात् ? भयाद् राजादित्रासात् । यस्तु जन इहास्मिन्नपि जन्मनि अमुत्रापि च परलोकेऽपि च अनुबन्धदोषवित् विषयासक्तिदोषवेदकः स कथं सुखे वैषयिके संसजति सम्बन्धमुपयातीति आश्चर्यमिति चाब्रवीत् उक्तवान् ॥ ४ ॥

परम दयालु भगवान ने जगत् के उपकार के लिये यह कहा यह बतलाते हैं—

अन्वयार्थ—(जनः) मनुष्य (अतिलोलः अपि 'सन्') अत्यन्त आसक्त होता हुआ भी (अनुबन्धदोषतः) आसक्ति रूप दोष से (भयात्) राजा आदि के भय के कारण (इह) इस संसार में (अकार्येषु) परस्त्री सेवन आदि अकरणीय कार्यों में (न प्रवर्तते) प्रवृत्त नहीं होता है फिर (इहापिअमुत्रापि) इस लोक और परलोक दोनों ही जगह (अनुबन्धदोषवित्) आसक्ति के दोष को जानने वाला मनुष्य (सुखे) विषयसुख में (कथं संसजति) कैसे आसक्त होता है यह आश्चर्य की बात है (इति च अब्रवीत्) हे अभिनन्दन जिनेन्द्र ! जगत् के जीवों को आपने यह भी बतलाया है ।

भावार्थ—विषयों में अत्यन्त आसक्ति रखने वाला मनुष्य भी आसक्ति के दोष को जानता है इसलिये राजा आदि के भय से वह कभी न करने योग्य कार्यों में प्रवृत्ति नहीं करता फिर जो मनुष्य यह समझता है कि विषयासक्ति से इस जन्म में अनेक दुःख भोगना पड़ते हैं और पर जन्म में भी नरकादि गतियों के दुःख सहन करना पड़ते हैं वह क्षणिक तृप्ति करने वाले इन्द्रिय सुख में कैसे आसक्त हो जाता है यह आश्चर्य की बात है। हे भगवन् ! आपने जगत् के जीवों को यह परमार्थं समझाकर इन्द्रिय सुख से विरक्त किया था ॥ ४ ॥

अत्रैवानु[1]बन्धदोषान्तरं दर्शयन्नाह—

स चानुबन्धोऽस्य जनस्य तापकृत् तृषोऽभिवृद्धिः सुखतो न च स्थितिः ।
इति प्रभो लोकहितं यतो मतं ततो भवानेव गतिः सतां मतः ॥ ५ ॥

सचानुबन्ध इत्यादि—चकारो भिन्नप्रक्रमस्तृषोऽभिवृद्धिरित्यस्यानन्तरं दृष्टव्यः । सोऽनन्त-रोक्तोऽनुबन्धोऽस्य विषयातिलोलस्य तापकः क्लेशप्रदः, न केवलमनुबन्धस्तापकः तृषोऽभिवृद्धिश्च । यावति स्त्र्यादिविषये सुवर्णाद्यर्थे वा आसक्तिलक्षणोऽनुबन्धः संजातः, तस्मिन् संपन्नेऽपि इतोऽप्यपरं यदि मम स्यात्ततोऽपरमित्युत्तरोत्तराकङ्क्षा तृषोऽभिवृद्धिः सा च तापिका तदलाभे तत्प्राप्त्यर्थं तल्लाभे तत्संरक्षणाद्यर्थं च संतापप्रबन्धस्य प्रवृत्तेः । ननु विषयसुखं प्राप्य संतापविवर्जिता जनस्य स्थितिर्भविष्यतीत्याह—सुखतो न च स्थितिः सुखतःसंप्राप्तविषयसुखलवमात्रादस्य जनस्य न च नैव स्थितिः सुखेनावस्थानं पुनः संतापप्रबन्धप्रवृत्तेः । इति एवं प्रभोऽभिनन्दन स्वामिन् लोकहितं लोकेभ्यो हितमुपकारकं यतो यस्मात्कारणात् त्वदीयं मतं ततः कारणाद्भवानेव गतिः शरणं सतां

१. बन्धे ख० ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विवेकिनां मुक्त्यर्थिनां मतः सद्भिरभिप्रेत इत्यर्थः 'मतिबुद्धिपूजार्थाच्च' इति संप्रतिक्तः तद्योगे सतामित्यत्र भवतीत्ययेन कर्तृतां कर्तरिक्तः ॥ ५ ॥

विषयासक्ति रूप अनुबन्ध में और भी दोष दिखलाते हुए कहते हैं—

अन्वयार्थ—(सः अनुबन्धः) वह आसक्तता (च) और आसक्तता से उत्पन्न होने वाली (तृषोऽभिवृद्धिः) उत्तरोत्तर तृष्णा की वृद्धि–दोनों ही (अस्य जनस्य) इस विषयातिसक्त मनुष्य के लिये (तापकृत्) संताप उत्पन्न करने वाली है (सुखतः) प्राप्त हुए अल्पमात्र विषय सुख से (न च स्थितिः) जीव को सुख से स्थिति नहीं होती अर्थात् अल्प सुख से जीव सन्तुष्ट नहीं होता (इति) इस तरह (प्रभो !) हे स्वामिन् (यतः) चूंकि (मतं) आपका मत (लोकहितं) लोक कल्याणकारी है (ततः) इसलिये (भवानेव) आप ही (सतां) विवेकशाली सत्पुरुषों के (गतिः) शरण (मतः) माने गये हैं।

भावार्थ—पहले जिस विषयासक्ति का वर्णन किया जा चुका है वह इस विषयलम्पट मनुष्य के लिये संताप उत्पन्न करने वाली है और विषयासक्ति से न केवल संताप उत्पन्न होता है किन्तु आगे-आगे तृष्णा की और भी वृद्धि होती जाती है। विषयलम्पट मनुष्य को जो थोड़ा सुख प्राप्त होता है उससे इसकी स्थिति नहीं होती अर्थात् उससे सन्तुष्ट होकर नहीं बैठता। हे भगवन्! आपका मत लोकहितकारी है क्योंकि आपके मन में यह उद्घोषित किया गया है कि विषयासक्ति से आज तक कोई सुखी नहीं हुआ है यदि हुआ है तो विषयेच्छाओं की निवृत्ति से ही सुखी हुआ है इसलिये सुख के अभिलाषी मनुष्य विषयासक्ति को छोड़कर विषयेच्छाओं की निवृत्ति करो। ऐसा उपदेश देने से आप ही सत्पुरुषों के लिये शरण हैं उनके मत में परामर्थ रक्षक हैं।

इति अभिनन्दन जिन स्तवनम्

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(५) श्री सुमतिजिनस्तवनम्

अन्वर्थसंज्ञः सुमतिर्मुनिस्त्वं स्वयं मतं येन सुयुक्तिनीतम् ।
यतश्च शेषेषु मतेषु नास्ति सर्वं क्रियाकारकतत्त्वसिद्धिः ॥१॥

अन्वर्थसंज्ञ इत्यादि—उपजातिच्छन्दः । अन्वर्था अनुमतार्था संज्ञा नाम यस्यासावन्वर्थसंज्ञा यथार्थनामेत्यर्थः । कासौ संज्ञा अन्वर्था तस्येत्याह–सुमतिरिति–शोभना मतिर्यस्यासौ सुमतिः, कथंभूतः ? मुनिः प्रत्यक्षवेदी, कथं शोभना मतिरस्य सिद्धा यतोऽन्वर्थसंज्ञत्वं स्यादित्याह–स्वयमित्यादि–स्वयमात्मना मतमङ्गीकृतं तत्त्वं येन कारणेन सुयुक्तिनीतं शोभना युक्तिरुपपत्तिः सुयुक्तिस्तया नीतं प्रणीतं तस्यां वा नीतं प्रापितं अनेकधर्मात्मकं जीवादितत्त्वं विवक्षिताविवक्षितधर्मगुणप्रधानभावेन प्रतिपादितं प्रमाणगोचरचारितया वा व्यवस्थापितमित्यर्थः । न केवलमेतस्मात्कारणात्त्वं सुमतिः किन्त्वेतस्मादपीत्याह–यतश्च–यस्माच्च कारणात् शेषेषु मतेषु त्वन्मतादन्येषु मतेषु नास्ति न विद्यते, कासावित्याह–सर्वेत्यादि–क्रियाश्च कारकाणि च क्रियाकारकाणि सर्वाणि च तानि क्रिया कारकाणि च तेषां तत्त्वं स्वरूपं तस्य सिद्धिरुत्पत्तिर्ज्ञप्तिर्वा । नहि क्षणिकैकान्ते उत्पत्तिर्घटते कारणत्वेनाभिमतक्षणस्य क्षणिकत्वेन सर्वथा, नष्टत्वात्, कार्यत्वेनाभिमतक्षणस्य च सर्वथालब्धात्मलाभतयासत्वात् । नचासत्खरविषाणतुल्यं कस्यचित्कारणं कार्यं वा युक्तमतिप्रसङ्गात् । नापि नित्यैकान्ते सा घटते सर्वथा अविकारिणः खपुष्पवत् कार्यकारणभावाभावात् उत्पत्त्यनुपपत्तेः । अतएव ज्ञप्तिरपि क्षणिकाद्येकान्ते दुर्घटा, उत्पन्ने हि प्रमाणं ज्ञापकं भवति न च तदेकान्ते उत्पत्तिः सम्भवतीत्युक्तम् ॥ १ ॥

भगवान् 'सुमति' इस नाम की सार्थकता बतलाते हैं—

अन्वयार्थ—हे भगवन् ! (त्वम्) आप (मुनिः) प्रत्यक्ष ज्ञानी हैं तथा (सुमतिः अन्वर्थ संज्ञः) सुमति इस सार्थक संज्ञा से युक्त हैं—उत्तम बुद्धि से सहित होने के कारण आपका 'सुमति' नाम सार्थक है (येन) क्योंकि आपने (सुयुक्तिनीतं) उत्तम युक्तियों से युक्त (तत्त्वं) तत्त्व (स्वयं मतं) स्वयं स्वीकृत किया है (च) और (शेषेषु मतेषु) आपके मत से शेष अन्य मतों में (सर्वक्रियाकारकतत्वसिद्धिः) सम्पूर्ण क्रियाओं तथा कर्ता कर्म करण आदि कारणों की तत्त्वसिद्धि (नास्ति) नहीं है ।

भावार्थ—'सुष्ठु शोभना वा मतिर्यस्य स सुमतिः' जिसकी बुद्धि अच्छी हो वह सुमति है, इस व्युत्पत्ति के अनुसार हे भगवन् ! आपका यह 'सुमति' नाम सार्थक है । सार्थक नाम से युक्त होने के साथ-साथ आप मुनि भी हैं प्रत्यक्ष ज्ञानी भी हैं । आपका नाम सार्थक होने का कारण यह है कि आपने स्वयं ही बिना किसी की प्रेरणा के उस मत-धर्म को अङ्गीकृत किया है जो उत्तम युक्तियों से सहित है तथा आपके मत के सिवाय अन्य मतों में क्रिया कारक भाव की सिद्धि बिलकुल ही नहीं होती । क्योंकि सर्वथा क्षणिकवादी बौद्धों के मत में पदार्थ की न उत्पत्ति बनती है और न ज्ञप्ति ही । उसका कारण है कि जिस क्षण को कारण रूप से स्वीकृत किया जायगा वह सर्वथा नष्ट हो जाने से असत् रूप हो जावेगा और असत् से सत् की उत्पत्ति सर्वथा असम्भव है । इसी प्रकार नित्यैकान्त पक्ष में भी क्रिया कारक भाव की सिद्धि नहीं होती क्योंकि सर्वथा अविकारी पदार्थों से कार्य की उत्पत्ति गगन कुसुम के समान है ॥ १ ॥

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तदेव स्वयमङ्गीकृततत्त्वस्य सुयुक्तिनीतत्वं प्रदर्शयन्नाह—

अनेकमेकं च तदेव तत्त्वं भेदान्वयज्ञानमिदं हि सत्यम् ।
मृषोपचारोऽन्यतरस्य लोपे तच्छेषलोपोऽपि ततोऽनुपाख्यम् ॥ २ ॥

अनेकमित्यादि—तदेव जीवादिलक्षणं तत्त्वं अनेकमनेकस्वभावं सुखदुःखादि बालकुमारादिपर्यायापेक्षया, तदेव चैकं सकल पर्यायान्वयार्थैकद्रव्यापेक्षया, कथंभूतं सत्तदनेकमेकं च स्यादित्याह–भेदान्वयज्ञानं भेदान्वययोर्ज्ञानं ग्राहकं प्रमाणं यत्र जीवादितत्त्वे हि सुखादिभेदप्रतीतिर्भेदज्ञानं सुखादौ बालकुमारादौ च स एवाहमित्यात्मद्रव्यस्याभेदप्रतीतिरभेद ज्ञानं। ननु पर्यायमात्रमेव वास्तवं तत्त्वं न द्रव्यं तस्यानाद्यविद्याकल्पितत्त्वादतो भेदज्ञानमेव सत्यमिति सौगताः। जीवादिद्रव्यमेव वास्तवं न सुखादिपर्यायास्तेषामौपाधिकत्वादिति सांख्याः। अत्राह—इदं हि सत्यमिति, इदं भेदान्वयग्राहिज्ञानं हि स्फुटं सत्यं सकलप्रमाणवाधकवैधुर्यात्, क्षणिकचित्तादिक्षणेष्वेकत्वमेकसन्ततिपतितत्वेनारोपितमिति बौद्धाः। जीवादिद्रव्येष्वनेकत्वमुपचारात्ततोऽत्यन्तभिन्नैरनेकसुखादिपर्यायैः सम्बन्धेन तत्रानेकत्व व्यवहारादिति नैयायिकादयः। अत्राह—मृषोपचार इत्यादि—मृषा असत्यः क ? उपचारो भेदान्वयज्ञानादस्खलद्रूपात्तत्र भेदाभेदयोः वास्तवयोः प्रसिद्धे। तदन्यतरापह्नवे दूषणमाहअन्यतरेत्यादि अन्यतरस्यैकत्वस्यानेकत्वस्य वा लोपेऽभावे तच्छेषलोपोऽपि तस्माल्लुप्ताच्छेषस्यान्यस्यापि लोपः स्यात् द्रव्यपर्याययोरन्योन्याविनाभावित्वात्। ततोऽनुपाख्यं तत् स्यात् उपाख्या एकत्वानेकत्वादिस्वभावः, सा न विद्यते यस्य तदनुपाख्यं निःस्वभावमिति यावत्। तथाचावाच्यं तत् स्यात् स्वभावाभावे केनचिद्रूपेण तस्य वक्तुमशक्यत्वात् ॥ २॥

आगे तत्त्व की सुयुक्तता दिखलाते हुए कहते हैं—

अन्वयार्थ—(तदेव तत्त्वं) वही सुयुक्तिनीत तत्त्व (अनेकं च एकं) अनेक तथा एक रूप है। (हि) निश्चय से (इदं भेदान्वयज्ञानं) अनेक को विषय करने वाला यह भेदज्ञान और एक को विषय करने वाला यह अन्वयज्ञान (सत्यम्) यथार्थ है। इनमें से किसी एक को (उपचारः) रूप कल्पित मानना (मृषा) मिथ्या है क्योंकि (अन्यतरस्य) दो में से किसी एक का (लोपे) लोप–अभाव होने पर (तच्छेषलोपोऽपि) उससे शेष अन्य धर्म का भी अभाव हो जाता है और (ततः) दोनों का अभाव हो जाने से तत्त्व (अनुपाख्यम्) निःस्वभाव होने से अवाच्य हो जाता है।

भावार्थ—जीवादि तत्त्व सामान्य विशेषात्मक अथवा द्रव्यपर्यायात्मक है। तत्त्व के इन दोनों अंशों को ग्रहण करने के लिये जैनागम में द्रव्यार्थिक और पर्यायार्थिक इस तरह दो नय स्वीकृत किये गये हैं। पर्यायार्थिकनय की अपेक्षा जीव तत्त्व का आभ्यन्तर रूप सुख-दुःख आदि के भेद से अनेक रूप है और बाह्य रूप बाल कुमार तरुण तथा वृद्ध आदि के भेद से अनेक रूप है परन्तु द्रव्यार्थिक नय को अपेक्षा सुख-दुःख आदि आभ्यन्तर तथा बाल कुमार आदि बाह्य रूपों में 'यह वही है' इस तरह एकत्व की प्रतीति होने से तत्त्व एक रूप है। तत्त्व की यह द्विविधता सत्य है इसलिये उसे ग्रहण करने वाला ज्ञान भी सत्य है। यद्यपि बौद्धों का कहना है कि पर्याय-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मात्र ही वास्तविक तत्त्व है, द्रव्य वास्तविक तत्त्व नहीं है क्योंकि वह अनादि अविद्या से कल्पित है और सांख्यों का कहना है कि जोवादि द्रव्य ही वास्तविक है सुखादि पर्याय वास्तविक नहीं हैं क्योंकि वे उपाधिजन्य हैं। बौद्ध द्रव्य को उपचार-कल्पित मानते हैं और सांख्य पर्याय को उपचार मान कर उसका सर्वथा अभाव जैनदर्शन में स्वीकृत नहीं किया गया है। क्योंकि द्रव्य और पर्याय दोनों ही एक दूसरे से अविनाभूत हैं इनमें से एक का अभाव मानने पर दूसरे का अभाव स्वतः हो जाता है और जब दोनों का अभाव हो जाता है तब तत्त्व में रह ही क्या जाता है? वह अवाच्य या अभाव रूप हो जाता है। इस प्रकार हे सुमति जिनेन्द्र! सुयुक्तियों से युक्त तत्त्व का निरूपण आपने ही किया है॥ २॥

एवं द्रव्यपर्यायात्मकत्वं जीवादितत्त्वस्य प्रदर्श्येदानीं भावाभावात्मकत्वं प्रदर्शयितुमाह—

सतः कथंचित्तदसत्वशक्तिः खे नास्ति पुष्पं तरुषु प्रसिद्धम्।
सर्वस्वभावच्युतमप्रमाणं स्ववाग्विरुद्धं तव दृष्टितोऽन्यत्॥ ३॥

सतः कथञ्चिदित्यादि—ततो विद्यमानस्यात्मादितत्त्वस्य स्वरूपादिचतुष्टयेन सत्त्वशक्तिः कथंचित् पररूपादिचतुष्टयप्रकारेण तस्यासत्त्वशक्तिस्तथा प्रतीतेः। अत्र निदर्शनमाह–खे नास्तीत्यादि—खे आकाशे नास्ति पुष्पं तरुषु पुनः प्रसिद्धं प्रकर्षेण वादि प्रतिवादिनोरविप्रतिपत्त्या सिद्धं प्रमाणविषयतां गतं। हि सत्वमेव वस्तुनः स्वरूपं स्यात्तदा स्वरूपादिनेव पररूपादिनापि तस्य सत्वं स्यात्तथा च तद्वत् खेऽपि पुष्पस्य सत्वं स्यात्, नचैतद्युक्तम् प्रतीतिविरोधादतः सत्त्वाद्वैत-वादिनो मतमयुक्तमेव यदि पुनरसत्त्वमेव वस्तुनः स्वरूपमिष्यते तदा पररूपादिचतुष्टयेनेव स्व-रूपादिचतुष्टयेनापि असत्त्वं स्यात्तथा च खे इव तरुष्वपि पुष्पस्यासत्त्वं स्यात्, नचैवमस्ति प्रतीति-विरोधादतः शून्यतैकान्तमतमप्यनुपपन्नम्। एतदेवाह–सर्वेत्यादि—सर्वे च ते स्वभावाश्च अस्तित्व-नास्तित्वादिसकल रूपाणि तेभ्यश्च्युतमपगतं तानि वा च्युतानि यस्मात्तदेवंविधमसत्त्वाद्वैतरूपं सकलशून्यता लक्षणं वा तत्त्वं अप्रमाणं, न विद्यते व्यवस्थापकं प्रमाणमस्य। कुतस्तस्य व्यवस्थापकं तन्नास्तीति चेत्? अत्राह—स्ववागित्यादि। तव दृष्टिः सर्वं जीवादितत्त्वमनेकान्तात्मकमिति मतं ततोऽन्यत् सत्ताद्वैतलक्षणं शून्यतैकान्तस्वभावं वा तत्त्वं तत्प्रमाणमभ्युपगच्छतां तद्वादिनां स्ववाचा-विरुद्धं स्यात् माता मे वन्ध्येत्यादिवत्। यदि हि अद्वैतं कथं प्रमाणं द्वैतप्रसङ्गात्। यदि च शून्यतै-कान्तः कथं प्रमाणं तत्सद्भावतस्तदैकान्त विरोधानुषङ्गात्।

इस प्रकार जीवादि पदार्थों की द्रव्य और पर्याय रूपता दिखलाकर अब भावाभावात्म-कता दिखलाते हैं—

अन्वयार्थ—(सतः) स्वद्रव्यक्षेत्र काल भाव की अपेक्षा सद्रूप जीवादि पदार्थ के (कथञ्चित्) किसी अपेक्षा–पर द्रव्य क्षेत्र काल भाव की अपेक्षा (असत्त्वशक्तिः) असद् रूपता है जैसे कि (पुष्पं) फूल (तरुषु) वृक्षों पर-प्रसिद्धं) प्रसिद्ध हैं और (खे) आकाश में (नास्ति) नहीं है। यदि तत्त्व को (सर्वस्वभावच्युतं) सत्व और ममत्व–दोनों प्रकार के स्वभाव से च्युत माना जावेगा तो वह (अप्रमाणं) प्रमाण रहित हो जावेगा। हे भगवन्! (तव दृष्टितः अन्यत्) तुम्हारे दर्शन के सिवाय अन्य सब दर्शन (स्ववाग्विरुद्धं) स्ववाणी से विरुद्ध हैं। अर्थात् **स्ववचनबाधित हैं।**

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भावार्थ—पदार्थ में सत् असत्, एक अनेक, भेद अभेद आदि अनेक विरोधी धर्म अपना-अपना अस्तित्व रखते हैं। उनमें यहाँ मात्र सत् धर्म की द्विविधरूपता का वर्णन किया गया है। संसार का प्रत्येक पदार्थ स्वद्रव्य क्षेत्र काल भाव की अपेक्षा सत्ता रूप है—विद्यमान है और पर-द्रव्य क्षेत्र काल भाव की अपेक्षा असत् रूप है—अविद्यमान है। यहाँ दृष्टान्त है कि जिस प्रकार फूल का अस्तित्व वृक्ष पर है अर्थात् वृक्षाधिकरण की अपेक्षा फूल अस्तिरूप है परन्तु आकाश में फूल नहीं है अर्थात् आकाशाधिकरण की अपेक्षा फूल अस्ति रूप नहीं है। इस तरह पदार्थ में परस्पर विरोधी सद सद्भावं–सद्–असद् रूपता स्वभाव से ही विद्यमान है परन्तु एक सत्ता ही के अद्वैत को स्वीकृत करने वाले लोग असत्व के पक्ष का निषेध करते हैं और असत्व के अद्वैत को स्वीकृत करने वाले लोग सत्व के पक्ष का निषेध करते हैं। आचार्य कहते हैं कि उनका ऐसा मानना अप्रमाण है क्योंकि जब दोनों धर्म कथंचित्–विवक्षाभेद से परस्पर अविनाभूत है तब एक का अभाव मानने पर दूसरे का अभाव स्वयं हो जायगा और इस स्थिति में प्रत्यक्ष सिद्ध वस्तु का अपलाप करना 'मेरी माता बन्ध्या है' इस वाक्य के समान स्ववचन बाधित होने से अप्रमाण—प्रमाण रहित माना जायगा ।।३।।

एवं युगपज्जीवादितत्त्वस्य सदसद्रूपतां प्रतिपाद्य विपक्षे दूषणपुरःसरतया क्रमेणापि तस्य तां प्ररूपयन्नाह—

न सर्वथा नित्यमुदेत्यपैति न च क्रियाकारकमत्र युक्तम् ।
नैवासतो जन्म सतो न नाशो दीपस्तमःपुद्गलभावतोऽस्ति ।।४।।

न सर्वथेत्यादि—यौगसांख्यमीमांसकैर्यदि सर्वथा–द्रव्यप्रकारेणापि पर्यायप्रकारेणापि नित्यं तत्त्वं परिकल्प्यते तदा तत्तथाविधं न तावदुदेति उत्पद्यते उत्तराकार स्वीकारं करोति न तथा अपैति पूर्वाकार परित्यागं करोति। पूर्वाकार परित्यागोत्तराकार स्वीकारयोः सर्वथा नित्ये विरोधात्। किञ्च क्रियाकारकसद्भावे सिद्धे उदयो व्ययो वा चिन्त्यते न च सर्वथा नित्ये वस्तुनि तत्सद्भावः संभवतीत्याह—न च नैव अत्र सर्वथा नित्ये वस्तुनि क्रिया, स्थानगमनादिलक्षणा कारकं च तस्या निर्वर्तकं तद्युक्तमुपपन्नं सर्वथैकरूपे हि वस्तुनि यदा गमनं तदा तदेव सदा स्यान्न स्थानम्, यदि स्थानं तदा तदेव स्यान्न गमनं। तथा गमनादिक्रियाया यदि तत्कारकं तदा सर्वदा तस्य कारकत्व प्रसङ्गात् न कदाचिदकारकत्वं स्यात् यतस्तत्क्रियोपरमः स्यात्। अथ कदाचित्तस्यास्तदकारकं तदा सर्वदा तदकारकत्वानुषङ्गात् न स्वप्नेऽपि तत्र तत्क्रियोपलम्भः स्यात्। ननु सर्वथानित्ये वस्तुन्युक्त-प्रकारेणोदयव्ययासंभवेऽपि न कथंचिन्नित्यानित्यात्मके भवन्मते तत्संभवो युक्तः सर्वथाक्षणिक एव तत्संभवादित्यत्राह—नैवासत इत्यादि—सर्वथेत्येतद्त्राप्यभिसंबध्यते। सर्वथा पर्यायप्रकारेणेव द्रव्य प्रकारेणाप्यसतो गगनेन्दीवरवन्नैव जन्म युक्तं सतश्च विद्यमानस्य घटादेः सर्वथा नाशो न युक्तः। ननु विद्यमानस्यापि प्रदीपादेः सर्वथा विनाशप्रतीतेः सतो न नाश इत्येतदयुक्तमित्यत्राह—दीप इत्यादि दीपः प्रदीपः तमःपुद्गलभावतोऽस्ति, पुद्गलो रूपि द्रव्यं, तमोरूपः पुद्गल स्तमःपुद्गलस्तस्य, भावस्तमःपुद्गलभावस्तेन तमःपुद्गलभावतोऽस्ति तमःपुद्गलरूपेणावतिष्ठत इत्यर्थः ।।४।।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इस प्रकार जीवाजीवादितत्त्वों की युगपत् सदसद्रूपता दिखलाकर अब प्रतिवादि के मत में दूषण देते हुए क्रम से सदसद्रूपता दिखलाते हैं—

अन्वयार्थ—(सर्वथा नित्यं) सब प्रकार से नित्य वस्तु (न उदेति न अपैति) न उत्पन्न होती है, न नष्ट ही होती है (च न) और न (अत्र) इस मान्यता में (क्रिया कारकं युक्तम्) क्रिया कारक भाव ही संगत होता है। क्योंकि (असतः) असत्—अविद्यमान पदार्थ का (नैव जन्म) जन्म नहीं होता और (सतो न नाशः) सत्—विद्यमान पदार्थ का नाश नहीं होता। यदि कहा जाय कि जलता हुआ दीपक बुझा देने पर उसमें क्या शेष रह जाता है यहाँ तो सत् का नाश मानना ही पड़ेगा तो उसका उत्तर यह है कि (दीपः) दीपक तमःपुद्गल भावतः अस्ति—अन्धकार रूप पुद्गल द्रव्य के रूप में विद्यमान रहता है।

भावार्थ—संसार के प्रत्येक पदार्थ द्रव्य और पर्याय रूप हैं। द्रव्य अपेक्षा से पदार्थ नित्य हैं और पर्याय अपेक्षा से अनित्य हैं। इस तरह अनेकान्त शैली से पदार्थों के नित्यानित्यात्मक होने पर भी योग, सांख्य और मीमांसक पदार्थों को सर्वथा नित्य मानते हैं और बौद्ध सर्वथा अनित्य। इस श्लोक में आचार्य महाराज ने सर्वथा नित्य और सर्वथा अनित्य इन दोनों एकान्त मान्यताओं का निराकरण किया है। वे कहते हैं कि यदि पदार्थ सर्वथा नित्य माना जाता है तो उसमें नवीन पर्याय की उत्पत्ति और पूर्व पर्याय का विनाश नहीं बन सकेगा। जीव द्रव्य में मनुष्य पर्याय के नष्ट होने पर ही देव पर्याय की उत्पत्ति होती है और पुद्गल द्रव्य में घट पर्याय के नष्ट होने पर ही कपाल पर्याय की उत्पत्ति देखी जाती है। इस प्रकार के उत्पाद और व्यय को प्रत्यक्ष देखते हैं अतः इसका अपलाप नहीं किया जा सकता। नवीन आकार का उत्पन्न होना उत्पाद है और पूर्व आकार का विनाश होना व्यय है। ये दोनों प्रकार के परिणमन सर्वथा नित्य पदार्थ में सम्भव नहीं हैं। इसके सिवाय सर्वथा नित्यपना की मान्यता में क्रियाकारकभाव भी नहीं बनता है। ठहरना तथा गमन करना आदि क्रिया कहलाती है और इन क्रियाओं का जो निर्वर्तक-रचयिता है वह कारक कहलाता है। वस्तु को सर्वथा एकरूप मानने पर यदि उसमें गमन रूप क्रिया हो रही है तो गमन ही होता रहेगा और ठहरना रूप क्रिया हो रही है तो ठहरना ही होता रहेगा विरुद्ध परिणमन नहीं हो सकता क्योंकि विरुद्ध परिणमन मानने पर सर्वथा एकरूपता नित्यपना का सिद्धान्त नष्ट हो जाता है। इसी तरह सर्वथा अनित्य पक्ष का निराकरण करते हुए कहते हैं कि पदार्थ को सर्वथा—पर्याय की तरह द्रव्य रूप से भी अनित्य स्वीकृत करने पर पदार्थ का निरन्वय नाश स्वीकृत करना पड़ेगा और उस स्थिति में अविद्यमान पदार्थ की उत्पत्ति और विद्यमान पदार्थ का नाश मानना पड़ेगा परन्तु ऐसा मानना उचित नहीं है क्योंकि जो पदार्थ है ही नहीं उसका जन्म नहीं हो सकता और जो पदार्थ है उसका सर्वथा नाश नहीं हो सकता। यदि कहा जाय कि जलते हुए दीपक को बुझा देने पर क्या शेष बचता है? यहाँ तो सत् का नाश ही अनुभव में आता है तो ऐसा कहना ठीक नहीं है क्योंकि यहाँ भी दीपक का सर्वथा नाश नहीं माना जाता जो दीपक पहले प्रकाश रूप पुद्गल द्रव्य था, अब बुझ जाने पर वही दीपक अन्धकार रूप पुद्गल द्रव्य के रूप में शेष रहता है सर्वथा नाश कहाँ हुआ? इस तरह कथंचित् नित्यानित्यत्व की मान्यता ही युक्ति संगत है ॥४॥

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इदानीं नित्यानित्यात्मत्वं जीवादेः प्ररूपयन्नाह—

विधिर्निषेधश्च कथञ्चिदिष्टौ विवक्षया मुख्यगुणव्यवस्था ।
इति प्रणीतिः सुमतेस्तवेयं मतिप्रवेकः स्तुवतोऽस्तु नाथ ।।५।।

विधिरित्यादि—विधीयत इति विधिरस्तित्वं नित्यत्वमित्यर्थः, निषिध्यत इति निषेधो नास्तित्वमनित्यत्वमिति यावत्, तौ च द्वौ जीवादिवस्तुनि कथंचित् द्रव्यपर्यायरूपता[1] प्रकारेणेष्टौ सुमतिस्वामिनो मतौ द्रव्यरूपतया हि तत्र विधिरिष्टः पर्याय रूपतया तु निषेध इति, अनयोर्मध्ये कस्य प्रधानता कस्य चाप्रधानतेत्यत्राह–विवक्षयेत्यादि-वक्तुमिच्छा विवक्षा तया मुख्यगुणव्यवस्था, मुख्यं प्रधानं गुणोऽप्रधानं तयोर्व्यवस्था स्थितिः। यस्य हि प्रति पत्तुर्द्रव्ये विवक्षा प्रवृत्ता तस्य विधिर्मुख्यो, निषेधो गौणो, यस्य तु पर्यायै सा प्रवृत्ता तस्य निषेधो मुख्यो, विधिर्गौणः, इत्येवं इयं प्राक्प्रदर्शितप्रकारा प्रणीतिः तत्त्वस्वरूपप्रतिपादनं सुमतेस्तव भगवतस्तां तत्त्वप्रणीतिं तद्द्वारेण भवन्तं वा स्तुवतो नमस्कुर्वतो वा मे मतेः प्रवेकः प्रविष्टता[2] प्रकर्षता इत्यर्थः अस्तु भवतु, नाथ सुमतिस्वामिन् ।।५।।

अब जीवादि तत्त्वों में नित्यानित्यात्मकपने का निरूपण करते हुए कहते हैं—

अन्वयार्थ—(विधिः) अस्तित्व (च) और (निषेधः) नास्तित्व दोनों ही (कथञ्चित्) किसी अपेक्षा से (इष्टौ) इष्ट हैं। (विवक्षया) वक्ता की इच्छा से उनमें (मुख्यगुणव्यवस्था) मुख्य और गौण की व्यवस्था होती है। (इति) इस तरह (इयं) यह (प्रणीतिः) तत्त्व निरूपण की पद्धति (सुमतेः तव) आप सुमतिनाथ स्वामी की है। (नाथ) हे स्वामिन् ! ('त्वां' स्तुवतः 'मे') आपकी स्तुति करते हुए मुझे (मति प्रवेकः) मति का उत्कर्ष प्राप्त होवे।

भावार्थ—नित्य अनित्य, एक अनेक, भेद अभेद आदि परस्पर विरोधी दो धर्मों में प्रथम पक्ष विधि पक्ष कहलाता है और दूसरा पक्ष उससे विरुद्ध होने के कारण निषेध पक्ष कहलाता है। यहाँ पूर्व श्लोक में नित्य और अनित्य का प्रसंग उठाया गया था इसलिए विधि से नित्य पक्ष और निषेध से अनित्य पक्ष लिया गया है। पदार्थ किसी विवक्षा से नित्य है और किसी विवक्षा से अनित्य है। वक्ता को इच्छा को विवक्षा कहते हैं उसी विवक्षा के अनुसार नित्य और अनित्य पक्ष में मुख्य और गौण की व्यवस्था होती है। वक्ता जिस समय द्रव्य का निरूपण करने में प्रवृत्त होता है उस समय नित्य पक्ष मुख्य होता है और अनित्य पक्ष गौण होता है तथा जिस समय पर्याय का निरूपण करने में प्रवृत्त होता है उस समय अनित्य पक्ष मुख्य होता है और द्रव्य पक्ष गौण होता है। वक्ता की इच्छा नय भेद के अनुसार परिवर्तित होती रहती है। नय परार्थ श्रुतज्ञान के भेद हैं परार्थ श्रुतज्ञान का प्रयोजन पर का अज्ञान दूर करना है। वक्ता के सामने जैसा श्रोता होता है उसके अनुसार वह पदार्थ का निरूपण करता है परन्तु दोनों प्रकार के निरूपण के समय उसकी दृष्टि दूसरे पक्ष पर भी स्थित रहती है। सुमतिनाथ भगवान् चूंकि (सुष्ठु मतिर्यस्यासौ सुमतिः) उत्तम मति से युक्त हैं अतः उनकी तत्त्व के निरूपण की पद्धति सर्वोत्कृष्ट थी। हे भगवन् ! आपको स्तुति के फलस्वरूप मुझे भी ऐसी ही श्रेष्ठमति प्राप्त हो ऐसी कामना आचार्य महाराज ने प्रकट की है ।।५।।

इति सुमतिजिनस्तवनम्

१. रूपतया ख० । २. विशिष्टता प्रकर्ष ख० ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(६) श्रीपद्मप्रभजिनस्तवनम्

पद्मप्रभः पद्मपलाशलेश्यः पद्मालयालिङ्गितचारुमूर्तिः ।
बभौ भवान् भव्यपयोरुहाणां पद्माकराणामिव पद्मबन्धुः ।। १ ।।

पद्मप्रभ इत्यादि—उपजातिच्छन्दः । पद्मप्रभः पद्मस्य प्रभेव प्रभा वर्णो यस्यासौ पद्मप्रभः षष्ठतीर्थंकरस्य संज्ञेयं, कथंभूतोऽसौ ? पद्मपलाशलेश्यः पद्मस्य पलाशं पत्रं तद्वल्लेश्या यस्य स शुक्ललेश्य इत्यर्थः । पुनरपि कथंभूतः ? पद्मालयालिङ्गितचारुमूर्तिः पद्ममालय आवासस्थानं यस्याः सा पद्मालया लक्ष्मीस्तया आलिङ्गिता क्रोडीकृता चार्वी मूर्तिरात्मस्वरूपलक्षणा शरीरस्वरूपलक्षणा च यस्य सः । अनन्तज्ञानादिलक्षणया हि लक्ष्म्या आत्मस्वरूपलक्षणा चार्वी निर्मला मूर्तिरालिङ्गिता, निःस्वेदत्वादिलक्षणया तु शरीरस्वरूपलक्षणा चार्वी सकललक्षणोपेता मूर्तिरालिङ्गिता । स किमित्याह—बभौ भासितवान् भवान् पद्मप्रभः, केषां सम्बन्धित्वेन भव्यपयोरुहाणां भव्या एव पयोरुहाणि कमलानि तेषां । केषामिव क इत्याह—पद्माकराणामिव पद्मबन्धुः पद्मानामाकराः खण्डानि तेषां यथा पद्मबन्धुरादित्यो विकासं कुर्वन् शोभितवान् तथा भगवानपि भव्यपयोरुहाणां हितोपदेशेन विकासं कुर्वन्निति ॥१॥

भगवान् के पद्मप्रभ इस नाम की सार्थकता दिखलाते हैं—

अन्वयार्थ—(पद्मपलाशलेश्यः) जिनके शरीर का वर्ण कमल-पत्र के समान लाल रंग का था तथा (पद्मालयालिङ्गितचारुमूर्तिः) जिनकी आत्मस्वरूप निर्मलमूर्ति अनन्तज्ञानादिरूप अंतरंग लक्ष्मी से एवं जिनकी समस्त उत्तम लक्षणों से सहित शरीर रूप मूर्ति निःस्वेदत्व आदि—पसीना के अभाव आदि रूप बाह्य लक्ष्मी से आलिङ्गित थी ऐसे (पद्मप्रभः) पद्मप्रभ जिनेन्द्र थे । हे जिनेन्द्र ! (भवान्) आप (भव्यपयोरुहाणां) भव्यरूप कमलों के हितोपदेश रूप विकास के लिये उस तरह (बभौ) सुशोभित हुए थे जिस तरह कि (पद्माकराणामिव पद्मबन्धुः) कमल समूह के विकास के लिये सूर्य सुशोभित होता है ।।

भावार्थ—भगवान् पद्मप्रभ के शरीर का वर्ण कमल दल के समान लाल रंग का था इसलिये उनका 'पद्मप्रभ' यह नाम सार्थक था । उनकी मूर्ति लक्ष्मी से आलिंगित थी मूर्ति से आत्मस्वरूप तथा शरीर की मुद्रा दोनों ही विवक्षित हैं इसी प्रकार लक्ष्मी से अन्तरंग और बहिरंग दोनों प्रकार की लक्ष्मियाँ विवक्षित हैं । अन्तरंग लक्ष्मी अनन्तज्ञानादि रूप हैं और निःस्वेदत्व आदि बाह्य लक्ष्मी है । चारु का अर्थ सुन्दर होता है परन्तु आत्म स्वरूप मूर्ति के पक्ष में चारु का अर्थ निर्मल—रागादि विकारों से रहित लिया जाता है और शरीर की मुद्रा के पक्ष में सामुद्रिक शास्त्र में प्रदर्शित अनेक शुभलक्षणों से सहित लिया जाता है । जिस प्रकार कमलवन को विकसित करता हुआ सूर्य सुशोभित होता है उसी प्रकार हितोपदेश द्वारा भव्य जीव रूपी कमलों को विकसित करते हुए—आनन्दविभोर करते हुए पद्मप्रभ जिनेन्द्र सुशोभित हो रहे थे ॥ १ ॥

कथमसौ हितोपदेशः प्रमाणं यथावत्पदार्थपरिज्ञानासंभवाद्वाग्व्यापारासंभवाच्चेत्याशङ्क्याह—

बभार पद्मां च सरस्वतीं च भवान्पुरस्तात्प्रतिमुक्तिलक्ष्म्याः ।
सरस्वतीमेव समग्रशोभां सर्वज्ञलक्ष्मीं ज्वलितां विमुक्तः ।। २ ।।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

बभारेत्यादि—यतो भगवान् धृतवान् पद्मां चानन्तज्ञानादिलक्ष्मीं न केवलं तां च सरस्वतीं च विशिष्टां वाणीं अतः कथं तदीयोपदेशस्याप्रामाण्यं ? कदा तां बभारेत्याह—पुरस्तादित्यादि-पुरस्तात् तत्पूर्वं, कस्याः ? प्रतिमुक्तिलक्ष्म्याः मुक्तिं लक्षणीकृत्य प्रतिमुक्ति, या लक्ष्मीस्तस्याः पूर्वं अर्हदवस्थायां बभार न सिद्धावस्थायामित्यर्थः। ननु पद्मां सरस्वतीं च बभारेत्ययुक्तमुक्तं वेदनीयसद्भावतो बुभुक्षादेरपि तेन धृतत्वादित्यत्राह-सरस्वतीमेवेति-एवकारेण बुभुक्षादेर्निरासः। पद्मायाः कुतो न निषेध इति चेदुक्तत्वात्। उक्तस्य हि एवकारेण न निषेधो यथा 'द्वौ पुत्रौ जनया मास वरं नारायणमेव चेति' किं विशिष्टां तां समग्रशोभां समग्रा परिपूर्णा शोभा यथावन्निखिलार्थं प्रतिपादनलक्षणा विभूतिः समवसरणादिर्विभूतिर्वा यस्याः। यदि प्रतिमुक्तिलक्ष्म्याः पुरस्तात्पद्मां सरस्वतीं च बभार तदा विमुक्तः सन्नसौ कां बभारेत्याह—सर्वज्ञलक्ष्मीं ज्वलितां विमुक्तः इति सर्वज्ञलक्ष्मीं अनन्तज्ञानादिविभूतिं ज्वलितां निर्मलां बभारेति सम्बन्धः। विशेषेण मुक्तः सकलकर्मरहितः सन्। सर्वज्ञलक्ष्मीज्वलितामिति च क्वचित् पाठः तत्र सर्वज्ञलक्ष्म्या ज्वलिता उज्ज्वला दीप्ता ज्ञानवत्सर्वत्राप्रतिहतेत्यर्थः। तथाभूतां सरस्वतीं बभार विमुक्तः सकलसङ्गविवर्जितः परम यतिरित्यर्थः॥ २॥

आगे भगवान् के हितोपदेश की प्रामाणिकता बतलाते हैं—

अन्वयार्थ—हे पद्मप्रभजिनेन्द्र! (भवान्) आपने (प्रतिमुक्तिलक्ष्म्याः पुरस्तात्) मोक्ष रूपी लक्ष्मी के पूर्व अर्थात् अरहन्त अवस्था में (पद्माम्) अनन्तज्ञानादिरूप लक्ष्मी (च) और (सरस्वतीं) दिव्यवाणी-दिव्यध्वनि को (बभार) धारण किया था अथवा (समग्रशोभां) समस्त पदार्थों के प्रतिपादन रूप विभूति और समवसरणादि रूप समस्त शोभा से युक्त (सरस्वतीमेव) दिव्यवाणी को ही धारण किया था पीछे (विमुक्तः सन्) समस्त कर्ममल से रहित होकर (ज्वलितां) देदीप्यमान-सदा उपयोग रूप (सर्वज्ञलक्ष्मीं) सर्वज्ञता रूप लक्ष्मी को धारण किया था।

भावार्थ—प्रारम्भ में शंका उठाई गइ थी कि भगवान् का हितोपदेश प्रामाणिक कैसे हो सकता है क्योंकि उन्हें पदार्थों का यथार्थ ज्ञान संभव नहीं है साथ ही वचनसम्बन्धी व्यापार का भी अभाव है। इस शंका का भी उत्तर देते हुए इस श्लोक में कहा गया है कि पद्मप्रभजिनेन्द्र अरहन्त अवस्था में अनन्तज्ञानादि रूप लक्ष्मी और सरस्वती-दिव्यध्वनिरूपी वाणी को धारण करते हैं इसलिये यथार्थ ज्ञान और वचन सम्बन्धी व्यापार के सद्भाव में उनका हितोपदेश प्रामाणिक ही है, अप्रामाणिक नहीं। यहाँ किसी ने फिर शंका उठाई कि असद्वेद्य के उदय से भगवान् क्षुधा आदि की वेदना को भी तो धारण करते हैं मात्र ज्ञानादिलक्ष्मी और दिव्यध्वनि रूप सरस्वती को धारण करने की बात क्यों की जाती है? तो इसका उत्तर यह है कि मोहोदय का अभाव होने से भगवान् अरहन्त अवस्था में सरस्वती को ही धारण करते हैं क्षुधा आदि की वेदना को नहीं। यहाँ एव शब्द से क्षुधा आदि की वेदना का ही अभाव समझना चाहिये अनन्तज्ञानादि रूप लक्ष्मी का नहीं क्योंकि एवकार के द्वारा प्रतिपादित वस्तु का निराकरण नहीं होता है। जैसे कि प्रसिद्ध है—'उसने दो पुत्र उत्पन्न किये नर और नारायण। यहाँ 'नारायणमेवच' इस एवकार से नर का निषेध नहीं होता। अरहन्त अवस्था के बाद जब भगवान् विमुक्त हो चुकते हैं अर्थात् समस्त कर्ममल से छूट जाते हैं तब वे देदीप्यमान-सदा प्रकाशमान रहने वाली सर्वज्ञलक्ष्मी को ही धारण करते हैं दिव्यध्वनि रूप सरस्वती को नहीं क्योंकि दिव्यध्वनि का सद्भाव सशरीर अवस्था में ही संभव है, अशरीर

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अवस्था में नहीं। यहाँ संस्कृत टीकाकार ने 'सर्वज्ञलक्ष्मी ज्वलितां विमुक्तः, इस पाठान्तर की कल्पना कर 'सर्वज्ञलक्ष्म्या ज्वलिता ताम्' इस प्रकार तृतीया समास के द्वारा 'सर्वज्ञ लक्ष्मी-ज्वलितां' पद को सरस्वती का विशेषण भी निरूपित किया है तथा 'विमुक्तः' शब्द का अर्थ मुक्त न कर समस्त परिग्रह से विमुक्त यतिपति अर्थात् अरहन्त किया है इस श्लोक का एक अर्थ यह भी होता है कि—

हे भगवन्! (भवान्) आपने (प्रतिमुक्तिलक्ष्म्याः पुरस्तात्) अरहन्त अवस्था के पूर्व अर्थात् गृहस्थ अवस्था में (पद्मां) अटूट धन सम्पत्ति अथवा अवधिज्ञानरूपी लक्ष्मी और (सरस्वती) द्वादशाङ्ग वाणी को (वभार) धारण किया था पश्चात् (विमुक्तः सन्) जीवन्मुक्त होनेपर (सर्वज्ञलक्ष्मीज्वलितां) सर्वज्ञलक्ष्मी से देदीप्यमान एवं (समग्रशोभां) सम्पूर्ण शोभा से युक्त—अप्रतिहत (सरस्वतीमेव) दिव्यध्वनि को ही धारण किया था ॥ २ ॥

भवदीयदेहदीप्तिप्रतानश्च प्रतिमुक्तिलक्ष्म्याः पुरस्तात् किं कृतवानित्याह—

शरीररश्मिप्रसरः प्रभोस्ते बालार्करश्मिच्छविरालिलेप।
नरामराकीर्णसभां प्रभावच्छैलस्य पद्माभमणेः स्वसानुम् ॥ ३ ॥

शरीररश्मि-इत्यादि—आलिलेप आलिप्तवान्, कोऽसौ? शरीर-रश्मिप्रसरः शरीरस्य रश्मयो दीप्तयः तेषां प्रसरो विस्तारः, किं विशिष्टो? बालार्करश्मिच्छविः बालः प्रत्यग्रोदितः स चासावर्कश्चादित्यस्तस्य रश्मयः किरणाः, छविराकारो बालार्करश्मीनां छविरिव छविर्यस्य स बालार्करश्मिच्छविः सिन्दूरारुणरश्मिप्रसर इत्यर्थः। कस्य? ते तव, कथंभूतस्य? प्रभोरिन्द्रादिस्वामिनः, कामालिलेप? नरामराकीर्णसभां नराश्च मनुष्याः अमराश्च देवास्तैराकीर्णा निचिता सा चासौ सभा च परिषत् तां, का इव कमित्याह-प्रभावदित्यादि-प्रभा इव प्रभावत्, प्रभा वा इति च क्वचित्पाठः तत्र वा शब्दः इवार्थे दृष्टव्यः कस्य? शैलस्य पर्वतस्य, कथंभूतस्य? पद्माभमणेः पद्मरागमणेः सम्बन्धिनः, स्वसानुं स्वकटनीं, अयमर्थो यथा पद्माभमणेः शैलस्य प्रभा स्वसानुमालिलेप तथा ते शरीररश्मि प्रसरस्तत्सभामिति ॥ ३ ॥

आगे आपके शरीर की कान्ति के विस्तार ने प्रतिमुक्ति लक्ष्मी के पूर्व क्या किया यह कहते हैं—

अन्वयार्थ—(बालार्करश्मिच्छविः) प्रातःकालीन सूर्य की किरणों के समान कान्ति वाले (ते प्रभोः) आप स्वामी के (शरीररश्मिप्रसरः) शरीर सम्बन्धी किरणों के समूह ने (नरामराकीर्णसभां) मनुष्य और देवों से व्याप्त समवसरण सभा को (पद्माभमणेः शैलस्य प्रभावत् स्वसानुमिव आलिलेप) उस तरह आलिप्त कर रक्खा था जिस तरह कि पद्मरागमणि के पर्वत की प्रभा अपने पार्श्वभाग को आलिप्त कर रखती है।

भावार्थ—पद्मप्रभ भगवान् के शरीर की प्रभा पद्मरागमणि के समान थी तथा उससे प्रातःकाल के समय उदित होते हुए सूर्य की किरणों के समान एक विचित्र प्रकार की आभा निकल कर मनुष्य और देवों से व्याप्त सभा को व्याप्त कर रही थी उससे ऐसा जान पड़ता था जैसे पद्म-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रागमणि के पर्वत की प्रभा अपनी कटनी–पार्श्वभाग को व्याप्त कर रही हो, इस श्लोक में 'प्रभावत्' के स्थान में 'प्रभा वा' इस पाठान्तर का संकेत भी संस्कृत टीकाकार ने किया है उस पाठ में वा का इव अर्थ में प्रयोग समझना चाहिये क्योंकि 'वा स्याद्विकल्पोपमयोरिवार्थेऽपि समुच्चये' इस कोष के अनुसार वा का अर्थ विकल्प उपमा इव का अर्थ और समुच्चय होता है ॥३॥

स इत्थंभूतो भगवान् किमेकत्रैव स्थाने उपविश्य स्थितः किं वा विहृत वा नित्यत्राह—

नभस्तलं पल्लवयन्निव त्वं सहस्रपत्राम्बुजगर्भचारैः।
पादाम्बुजैः पातितमारदर्पो भूमौ प्रजानां विजहर्थ भूत्यै ॥४॥

नभस्तलमित्यादि—त्वं विजहर्थ विहृतवान्, क्व ? भूमौ भूतले, किमर्थं ? भूत्यै विभूति निमित्तं, कासां ? प्रजानाम्, भगवतो हि विहरतः साक्षात्तावत् प्रजानां हेयोपादेयपदार्थ विवेक विभूतिर्भवति परम्परया तु पुण्यावाप्तिप्रभावात् स्वर्गादिविभूतिरपीति। ननु गौर्यादिना प्रेरित ईश्वर इवासौ किं रागाल्लोभादेर्वा भूमौ विजहर्थ इत्यत्राह–पातितमारदर्पः पातितो निपातितो निर्मूलितो मारस्य कामस्य दर्पो येन वीतरागः सन् विजहर्थ इत्यर्थः। किं कुर्वन्निव ? पल्लवयन्निव-उत्प्रेक्षते पल्लववत् किसलयवत्कुर्वन्निव 'किं तत्करोतीत्यादिनाणौ कृते विन्मतोरुचिति मतो तप।' किम् ? नभस्तलम् आकाशोपरितनभागं, कैः ? पादाम्बुजैः पादावेवाम्बुजानि सकललक्ष्मीनिवासत्वात्। तैः किं विशिष्टैः ? सहस्रपत्राम्बुजगर्भचारैः हेम निर्मितानि यानि सहस्रपत्राणि अम्बुजानि कमलानि तेषां गर्भेषु कोशेषु चारः प्रवर्तनं तेषां ते तैः ॥४॥

आगे इस प्रकार के भगवान् क्या एक ही स्थान पर बैठ कर रह गये अथवा विहार किया यह कहते हैं।

अन्वयार्थ—हे जिनेन्द्र ! (पातितमा दर्पः) कामदेव के गर्व को नष्ट करने वाले (त्वम्) आपने (सहस्रपत्राम्बुजगर्भचारैः) सहस्रदल कमलों के मध्य में चलने वाले अपने (पादाम्बुजैः) चरण कमलों के द्वारा (नभस्तलं) आकाश तल को (पल्लवयन्निव) पल्लवों से युक्त जैसा करते हुए (भूमौ) पृथिवी पर स्थित (प्रजानां विभूत्यै) प्रजाजनों की विभूति के लिये (विजहर्थ) विहार किया था।

भावार्थ—भगवान् जिनेन्द्र काम-क्रोध आदि समस्त विकारी भावों पर पूर्ण विजय प्राप्त कर चुकते हैं इसलिए उनका विहार मात्र लोक कल्याण के लिए होता है। जिस प्रकार मेघों का गर्जना, वरसना, ठहरना और भ्रमण करना उनकी इच्छा के बिना जनता के भाग्यानुसार स्वतः होता है उसी प्रकार जिनेन्द्र भगवान् का विहार करना, ठहरना तथा उपदेश देना उनकी इच्छा के बिना भव्य जीवों के भाग्यानुसार स्वतः होता है। उनका यह विहार मात्र लोक कल्याण के लिए होता है उनके विहार से दुर्भिक्ष आदि दूर होते हैं तथा लोगों के हृदय में सत्–असत् का विवेक जागृत होता है। भगवान् का विहार पाँच हजार धनुष ऊपर आकाश में होता है तथा देवकृत अतिशय के कारण उनके विहार काल में देवों के द्वारा सात आगे सात पीछे और एक चरणों के नीचे इस प्रकार पन्द्रह-पन्द्रह सहस्रदल कमलों की पन्द्रह पंक्तियों की रचना होती है। उन २२५

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कमलों के ऊपर उनका स्पर्श न करते हुए भगवान् का विहार होता है उस समय उन सहस्रदल कमलों तथा भगवान् के रक्तवर्ण पद तलों से ऐसा जान पड़ता है मानों आकाशतल अनेक पल्लवों–लाल-लाल किसलय दलों से ही व्याप्त हो रहा हो। यद्यपि भगवान् का यह विहार आकाश में होता है तथापि उसके प्रभाव से पृथिवी पर स्थित लोगों के वैभव की वृद्धि होती है[1] ॥४॥

आत्मन औद्धत्यं परिहरन्नाह—

गुणाम्बुधेर्विप्रुष मप्यजस्रं नाखण्डलः स्तोतुमलं तवर्षेः ।
प्रागेव मादृक् किमुतातिभक्ति-र्मां बालमालापयतीदमित्थम् ॥ ५ ॥

गुणाम्बुधेरित्यादि—गुणाम्बुधेः गुणसमुद्रस्य तव पद्मप्रभाख्यतीर्थंकरस्य ऋषेः सकलऋद्धिनिधानस्य विप्रुषमपि गुणलवमपि न केवलं सकलगुणस्वरूपं अजस्रमनवरतं अजस्येति च क्वचित्पाठः, तत्र न जायते नोत्पद्यते संसारसमुद्रे न परिभ्रमतीत्यजस्तस्य आखण्डल इन्द्रोऽचिन्त्यशक्तिरवध्यादिविशिष्ट-ज्ञान-सम्पन्नोऽपि स्तोतुमलं समर्थो न प्रागेव, मादृक् मद्विधोऽसमर्थः, किमर्थं तर्हि तत् स्तोत्रं कर्तुं प्रवृत्तोऽसीत्याह–किमुतेत्यादि–किमुत किन्तु भगवद्विषये या अतिभक्तिः अत्यनुरागः सा मां बालं भगवत्स्तुतिकरणे नाभिज्ञं आलापयति आभाषयति इदमेतत् संस्तवनं इत्थमुक्तप्रकारेण मां स्तुतिं कर्तुं प्रयोजयतीत्यर्थः ॥५॥

अब कवि अपनी उद्धतता का परिहार करते हुए कहते हैं—

अन्वयार्थ—हे भगवन्! (ऋषेः) समस्त ऋद्धियों के निधान स्वरूप (तव) आपके (गुणाम्बुधेः) गुण रूप सागर की (विप्रुषमपि) एक बूँद की भी (अजस्रम्) निरन्तर (स्तोतुं) स्तुति करने के लिये जब (आखण्डलः) इन्द्र (प्रागेव) पहले ही (अलं न) समर्थ नहीं हो सका है तब (मादृक) मेरे जैसा असमर्थ मनुष्य (किमुत) कैसे समर्थ हो सकता है ? अर्थात् नहीं हो सकता।

---

१. देवयात्रामिमां दिव्यामन्वेत्य परमाद्भुताम् ।
अद्भुतान्यर्थ दृष्ट्यादि सर्वाण्यसुभृतां भुवि ॥७५॥
आधयो नैव जायन्ते व्याधयो व्यापयन्ति न ।
ईतयश्चाज्ञया भर्तुर्नेति तद्देशमण्डले ॥७६॥
अन्धाः पश्यन्ति रूपाणि शृण्वन्ति बधिराः श्रुतिम् ।
मूकाः स्पष्टं प्रभाषन्ते विक्रमन्ते च पङ्गवः ॥७७॥
नात्युष्णा नातिशीताः स्युरहोरात्रादिवृत्तयः ।
अन्यच्चाशुभमत्येति शुभं सर्वं प्रवर्धते ॥७८॥
विहारानुगृहीतायां भूमौ न डमरादयः ।
दशाभ्यस्तयुगंभर्तुरहोऽत्र महिमा महान् ॥१०८॥
विभूत्योद्धतया भूत्यै जगतां जगतां विभुः ।
विजहार भुवंभव्यान् बोधयन् बोधदः क्रमात् ॥१०९॥—हरिवंशपुराण पर्व ५९

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(अतिभक्तिः) यह तीव्र भक्ति ही (मां बालं) मुझ अज्ञानी से (इत्थं) इस तरह (इदं) इस स्तवन को (आलापयति) कहला रही है।

भावार्थ—हे नाथ ! आप समस्त ऋद्धियों के भाण्डार तथा गुणों के सागर हैं। अवधिज्ञान आदि विशिष्ट शक्ति का धारक इन्द्र जब पूर्व काल में आपकी स्तुति करने के लिए प्रवृत्त हुआ तब वह आपके गुणसागर की एक बूँद की भी लगातार स्तुति नहीं कर सका तब मेरे जैसा असमर्थ-अल्पज्ञ मनुष्य आपकी स्तुति करने में कैसे समर्थ हो सकता है? फिर भी अज्ञानी होकर जो मैं इस तरह आपकी स्तुति करने में प्रवृत्त हुआ हूँ—आपकी स्तुति में दो शब्द बोल रहा हूँ सो यह आपकी तीव्रभक्ति ही बुलवा रही है। मैं स्वयं निज की शक्ति से नहीं बोल रहा हूँ, इस श्लोक में 'अजस्रं' के स्थान पर 'अजस्य' इस पाठान्तर का संकेत भी संस्कृत टीकाकार ने किया है जिसका अर्थ होता है जन्म से रहित अर्थात् संसार परिभ्रमण से दूरवर्ती। यह तव अर्थात् पद्मप्रभ भगवान् का विशेषण है ॥५॥

इति पद्मप्रभजिनस्तवनं समाप्तं।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(७) श्रीसुपार्श्वजिनस्तवनम्

स्वास्थ्यं यदात्यन्तिकमेष पुंसां स्वार्थो न भोगः परिभङ्गुरात्मा ।
तृषोऽनुषङ्गान्न च तापशान्तिरितीदमाख्यद्भगवान्सुपार्श्वः ॥ १ ॥

स्वास्थ्यमित्यादि—उपजातिच्छन्दः । स्वस्मिन् कर्मविमुक्ते आत्मस्वरूपे तिष्ठतीति स्वस्थमनन्तज्ञानादि तस्य भावः स्वास्थ्यं, कथंभूतं ? यत् आत्यन्तिकमविनश्वरम् । एष पुंसां स्वार्थः स्वस्यार्थः साध्यं प्रयोजनं । वैषयिकसुखाद्यनुभवः कुतो न स्वार्थ इत्यत्राह—न भोग इत्यादि—एष प्रतीयमानो वैषयिक-सुखानुभवरूपो भोगो न स्वार्थः पुंसां, कुतः ? परिभङ्गुरात्मा यतः शाश्वतस्वरूपसिद्धयर्थो हि प्रेक्षावतां प्रयासो न च भोगः शाश्वतस्वभावो विषयसन्निधाने विद्युदुन्मेषमात्रभावित्वात्तस्य तथाविधोऽप्यसौ प्रशान्तिहेतुत्वात्स्वार्थो भविष्यतीत्याह—तृष इत्यादि—तृष उत्तरोत्तरभोगाकाङ्क्षाया अनुषङ्गात् अनुबन्धात् न च नैव तापशान्तिः तापस्य शरीरमानसदुःखस्य शान्तिरुपशम इत्येवं इदमात्मोत्थवैषयिकसुखादीनां स्वरूपमाख्यदब्रवीत् भगवान् विशिष्टज्ञानवान् इन्द्रादीनां पूज्यो वा सुपार्श्वः सप्तमतीर्थंकरः, शोभनौ सर्वलक्षणोपेतौ पार्श्वौ शरीरोभयप्रदेशौ यस्य । पार्श्वावित्युपलक्षणं सकलाङ्गावयवानाम् ॥ १ ॥

आगे सच्चे स्वास्थ्य का लक्षण कहते हुए कहते हैं—

अन्वयार्थ—(यत् आत्यन्तिक स्वास्थ्यम्) जो अविनाशी स्वरूपलीनता है (एष) यही (पुंसां) जीवात्माओं का (स्वार्थः) निजी प्रयोजन है (परिभङ्गुरात्मा) क्षणभङ्गुर (भोगः) भोग (स्वार्थः न) निजी प्रयोजन नहीं है । (तृषः) उत्तरोत्तर भोगाकाङ्क्षा की (अनुषङ्गात्) वृद्धि से (न च तापशान्तिः) ताप की शान्ति नहीं होती है (इति इदम्) इस प्रकार यह विवेक (भगवान् सुपार्श्वः) विशिष्टज्ञानी सुपार्श्वनाथ ने कहा है ।

भावार्थ—कर्म से रहित आत्मस्वरूप में स्थित रहने से अनन्तज्ञानादि स्वस्थ कहलाते हैं उनका जो भाव है उसे स्वास्थ्य कहते हैं । इस प्रकार ज्ञानादि गुणों की जो स्वाभाविक परिणति है वही आत्मा का स्वार्थ है—निजी प्रयोजन है । वैषयिक सुखों का अनुभव निजी प्रयोजन नहीं है क्योंकि वैषयिक सुख का अनुभव बिजली की कौंद के समान क्षणभङ्गुर है इसके सिवाय वैषयिक सुखों के अनुभव से तृष्णा की वृद्धि होती है जिस प्रकार ईंधन से अग्नि उत्तरोत्तर बढ़ती है उसी प्रकार वैषयिक सुखों से तृष्णा उत्तरोत्तर बढ़ती है । तृष्णा की वृद्धि होती रहने से न शारीरिक ताप की शान्ति होती है और न मानसिक ताप की । संसार का प्राणी अनादिकाल से भोग सामग्री में संलीन होकर उसी के एकत्र करने में रात-दिन लगा रहता है यहाँ भगवान् सुपार्श्वनाथ ने कहा है कि हे भद्रप्राणी ! जिन भोगों के पीछे तू पड़ रहा है वे शान्ति के कारण नहीं हैं इसलिये इनकी ओर से दृष्टि हटाकर स्वभाव की ओर दृष्टि दे, उसी से तेरे शारीरिक और मानसिक ताप की शान्ति होगी । भगवान् सुपार्श्वनाथ उत्तमपार्श्व—सुन्दर पसलियों अथवा उपलक्षण से समस्त सुन्दर अवयवों के धारक थे इसलिये उनका 'सुपार्श्व नाम सार्थक था । साथ ही वे भग—विशिष्ट ज्ञान अथवा अपरिमित ऐश्वर्य के धारक होने से भगवान् कहलाते थे ॥ १ ॥

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न केवलं तत्सुखादीनां स्वरूपं कथितवान् अपि तु शरीरस्य चेत्याह—

अजङ्गमं जङ्गमनेययन्त्रं यथा तथा जीवधृतं शरीरम् ।
बीभत्सु पूति क्षयि तापकं च स्नेहो वृथात्रेति हितं त्वमाख्यः ॥ २ ॥

अजङ्गममित्यादि—अजङ्गमं बुद्धिपूर्वकपरिष्पन्द–व्यापार रहितं, जङ्गमनेययन्त्रं जङ्गमनेयं च तद्यन्त्रं क्रीडार्थं रचितं हस्त्यादिरूपं तदजङ्गमं यथा जङ्गमेन तन्मध्यस्थित पुरुषेण नेवं कार्येषु प्रवर्तनीयं तथा जङ्गमं शरीरं जीवधृतं सकलकार्येषु गमनादिषु जीवायत्तप्रवृत्तिकं, पुनरपि कथं-भूतं ? बीभत्सु विरूपकं, पूति दुर्गन्धसहितं, क्षयि विनाशि, तापकं च बहुदुःखकारि अत्रास्मिन्ने-वंविधे शरीरे स्नेहोऽनुरागो वृथा निःफलः, मोक्षे तत्कारणे चानुरागः कर्तव्य इत्यर्थः इत्येवं हितं त्वमाख्यः, हितस्य मोक्षसौख्यस्य तत्कारणस्य च वैराग्यादेः कारणत्वादेतत् शिक्षारूपं वचो हितं सुपार्श्वो भगवानाख्य उपदिष्टवान् ॥ २ ॥

भगवान् ने न केवल उक्त सुखादि का उपदेश दिया किन्तु शरीर के उपदेश का भी क्रम रखा है यह कहते हैं—

अन्वयार्थ—(यथा) जिस प्रकार (जङ्गमनेययन्त्रं) गतिशील मनुष्य के द्वारा चलाया जाने वाला यन्त्र स्वयं (अजङ्गमं) गति रहित होता है (तथा) उसी तरह (जीवधृतं) जीव के द्वारा धारण किया हुआ (शरीरं) शरीर स्वयं (अजङ्गमं) गति रहित है—जड़ है । साथ ही यह शरीर (बीभत्सु) घृणित (पूति) दुर्गन्ध से युक्त (क्षयि) विनश्वर (च) और (तापकं) संताप उत्पन्न करने वाला है इसलिये (अत्र) इस शरीर में (स्नेहः) अनुराग करना (वृथा) व्यर्थ है (इति) यह (हितं) हितकारक वचन (त्वम्) हे सुपार्श्व जिन ! आपने (आख्यः) कहा है ।

भावार्थ—मनुष्य का सबसे अधिक राग अपने शरीर से होता है स्त्री, पुत्र तथा मकान आदि से जो राग है वह शरीर को आराम पहुँचाने वाले होने से शरीर मूलक ही होता है इसलिये इस श्लोक में शरीर की दशा का वर्णन करते हुए कहा गया है कि जिस प्रकार क्रीडा के लिये रचा हुआ हाथी, घोड़ा आदि का यन्त्र जड़ होने से स्वयं निःस्पन्द–निश्चेष्ट होता है किन्तु उसके बीच में स्थित पुरुष के द्वारा चालित होता है उसी प्रकार यह शरीर पुद्गल रूप जड़ पदार्थों से रचित होने के कारण स्वयं निष्पन्द है—गति से रहित है किन्तु मध्य में स्थित जीव के द्वारा गति-शील होता है—गमनागमन करता है और विषयों में प्रवृत्त होता है । हे आत्मन् ! तू ज्ञान का पुञ्ज गतिशील चेतन द्रव्य है और तेरा यह शरीर तुझसे अत्यन्त भिन्न अचेतन द्रव्य है । तेरा शरीर रूप परिणमन त्रिकाल में नहीं हो सकता है और शरीर का भी तुझ रूप परिणमन त्रिकाल में संभव नहीं है फिर भिन्न पदार्थ में अनुराग कैसा ? इसके सिवाय यह शरीर मल मूत्र से युक्त होने के कारण अत्यन्त घृणित है, दुर्गन्धित है, विशरण—गलन रूप होने से विनश्वर है और भोगा-कांक्षाओं का पूरक न होने से संताप उत्पन्न करने वाला है । इसलिये इस विजातीय घृणित पर-द्रव्य में स्नेह करना—इसे अपना समझना व्यर्थ है इस प्रकार के हितकारक वचन हे सुपार्श्वजिन ! आपने कहे थे ॥ २ ॥

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यदि भगवान् हितमुपदिष्टवान् तदा भवदीयं वचः श्रुत्वा किमिति सर्वोऽपि जनः शरीरादिषु विरज्य हिते मार्गे न प्रवर्तत इत्याह—

अलङ्घ्यशक्तिर्भवितव्यतेयं हेतुद्वयाविष्कृतकार्यलिङ्गा ।
अनीश्वरो जन्तुरहंक्रियार्तः संहत्य कार्येष्विति साध्ववादीः ॥ ३ ॥

अलङ्घ्यशक्तिरित्यादि—अलङ्घ्या अनतिक्रमणीया शक्तिः सामर्थ्यं यस्याः सा अलङ्घ्यशक्तिः, कासौ ? भवितव्यता दैवं कर्मेत्यर्थः । कुतः सा तथाविधा प्रतिपन्ना प्रत्यक्षादनुमानाद्वा ? न तावत्प्रत्यक्षात् अतीन्द्रियतया तस्याः अस्मदादिप्रत्यक्षागोचरत्वात् । अथानुमानादसौ प्रतिपन्ना तर्हि किमत्र लिङ्गमिति ? अत्राह—हेतुद्वयाविष्कृत कार्यलिङ्गा हेत्वोः शुभेतरकर्मलक्षणयोर्बाह्याभ्यन्तरस्वरूपयो र्वा द्वयं तेना विष्कृतं जनितं यत्कार्यमिष्टानिष्टार्थलाभलक्षणं तल्लिङ्गं यस्याः । ननु मन्त्रतन्त्रादिदृष्टसामग्रीसमन्वितो जीव एव सुखदुःखादिकार्यकर्ता भविष्यति तत्कथं कार्यलिङ्गाद्भवितव्यता अनुमीयत इत्याशङ्क्याह—अनीश्वर इत्यादि, न ईश्वरोऽप्रभुरसमर्थः, कोऽसौ ? जन्तुः प्राणी, कथंभूतो ? अहंक्रियार्तः, अहंक्रियाभिरहंकारै र्व्यामोहरुपैरार्तः पीडितः संसारी जीवो भवितव्यता निरपेक्षोऽसमर्थ इत्यर्थः । क्व ? कार्येषु सुखादिषु, कथं ? संहत्य सुखादिकार्योत्पादकेषु मन्त्रतन्त्रादिसहकारि कारणेषु मिलित्वा । यदि हि भवितव्यतानपेक्षस्तत्सहिततामात्रेणात्मा तत्र समर्थः स्यात् तदा सर्वेषां तत्सहितानां समानं फलं स्यात्, नचैवमस्ति समानोपदेशानां समानमन्त्रतन्त्राद्यनुष्ठायिनां समानाहारावासानामपि केषांचित्सफलं, दृश्यते केषांचित्तु निष्फलम्, अतो येषामदृष्टं प्राञ्जलं तेषां तत्सफलमन्येषां तु निष्फलमिति सिद्धान्तः तत्कार्यलिङ्गा भवितव्यता अतएवोक्तं इयमितिइयं सकललोकप्रसिद्धा कार्यलिङ्गतया भवितव्यता । अथवा अलङ्घ्यशक्तिर्भवितव्यतेयमित्ययुक्तमुक्तं संसारमोक्षादिकार्याणामीश्वरकृतत्वादित्याशङ्क्याह—अयमहंक्रियार्तः संसारी जन्तुरनीश्वरो न विद्यते ईश्वरः कारणमस्येत्यनीश्वरः, क्व ? संहत्यकार्येषु संहत्यानि संघातरूपाणि बहूनीत्यर्थः यानि कार्याणि तेषु, अयमर्थः ईश्वरस्यैकभावस्याप्तस्य च विभिन्न देशकालं ? कारण नरकादि कार्यकर्तृत्वमयुक्तमेकस्वभावत्वा[२]नुषङ्गान्निर्घृणत्वप्रसङ्गाच्च । तददृष्टवशात्तथाकर्तृत्वे सिद्धेश्वरस्यापि भवितव्यता वशात्प्रवृत्तिः तस्मान्नासौ प्राणिनां दुःखादि कार्येषु कारणं किन्तु भविभवितव्यतैव तत्कारणमित्येवं साधु यथा भवति तथा वादीरुक्तवान् ततः सिद्धं भवितव्यताया अलङ्घय शक्तित्वम् ॥ ३ ॥

यदि भगवान् ने हित का उपदेश दिया था तो उनके वचन सुनकर सभी लोग शरीरादि से विरक्त होकर हित के मार्ग में क्यों नहीं लगे यह कहते हैं—

अन्वयार्थ—(हेतुद्वयाविष्कृतकार्यलिङ्गा) शुभ-अशुभ कर्म अथवा बाह्य और आभ्यन्तर दोनों कारणों से उत्पन्न होने वाला कार्य ही जिसका लिङ्ग—ज्ञापक है ऐसी (इयं) यह (भवितव्यता) भवितव्यता—होनहार (अलङ्घ्यशक्तिः) अलङ्घ्यशक्ति है—किसी भी तरह टाली नहीं जा सकती । तथा भवितव्यता की अपेक्षा नहीं रखने वाला (अहंक्रियार्तः) अहंकार से पीड़ित

कालाकार नरकादि—ख० । २ एक स्वभावत्वाभावानुषङ्गात् ख० ।

१. 'कारणद्वय सान्निध्यात्सर्वकार्यसमुद्भवः' उत्तरपुराण पर्व ७३ श्लोक ५३ ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

हुआ (जन्तुः) संसारी प्राणी (संहत्य) अनेक सहकारी कारणों से मिलकर भी (कार्येषु) सुख दुःखादि कार्यों में (अनीश्वरः) असमर्थ है। हे सुपार्श्व जिनेन्द्र ! आपने (इति) यह (साधु) ठीक ही (अवादीः) कहा है !

भावार्थ—जीवों के सुख दुःखादि रूप कार्यों की उत्पत्ति उनके शुभ अशुभ कर्मों के उदय की अनुकूलता होने पर होती है अथवा अन्तरङ्ग और बाह्य—उपादान और निमित्त दोनों कारणों की योग्यता होने पर होती है दोनों में से एक की कमी रहने पर कार्य की उत्पत्ति नहीं होती। इस तरह दोनों कारणों की अनुकूलता से उत्पन्न होने वाला कार्य ही जिसका ज्ञापक है ऐसी भवितव्यता—होनहार को कोई टाल नहीं सकता। भवितव्यता की अपेक्षा न कर मात्र पुरुषार्थ की अपेक्षा रखने वाला अहंकारी मनुष्य सब सामग्री जुटा कर भी कार्य करने में असमर्थ रहता है। यदि ऐसा न होता तो समान उपदेश को प्राप्त समान मन्त्र तन्त्र आदि का अनुष्ठान करने वाले एवं समान आहार तथा समान आवास को ग्रहण करने वाले लोगों में किन्हीं का कार्य सफल देखा जाता है और किन्हीं का निष्फल, यह नहीं होता। इससे जान पड़ता है कि जिनका कर्मोदय अनुकूल है उनका कार्य सफल हो जाता है और जिनका कर्मोदय अनुकूल नहीं है उनका कार्य सफल नहीं हो पाता है। कर्मोदय की अनुकूलता ही भवितव्यता कहलाती है यह भवितव्यता अलङ्घ्यशक्ति है—इसे कोई टाल नहीं सकता है। इसी भवितव्यता को दैव, अदृष्ट, भाग्य अथवा कर्म कहा जाता है। अन्तरङ्ग कारण की अपेक्षा भवितव्यता और बहिरङ्ग कारण की अपेक्षा पुरुषार्थ दोनों का स्थान जैनागम में निरूपित है। अबुद्धिपूर्वक जो कार्य सिद्ध होते हैं उनमें भवितव्यता को प्रधानता दी जाती है और बुद्धिपूर्वक जो कार्य सिद्ध होते हैं उनमें पुरुषार्थ को प्रधानता दी जाती है अनेकान्त की शैली से दोनों का समन्वय होता है। यहाँ ईश्वरवादी यह कहते हैं कि 'भवितव्यता अलङ्घ्यशक्ति है, यह कहना ठीक नहीं है क्योंकि संसार और मोक्ष ईश्वर का किया हुआ है। ईश्वर की इच्छानुसार ही जीवों का संसार और मोक्ष होता है इसका समाधान करने के लिये संस्कृत टीकाकार 'अनीश्वरो जन्तुरहंक्रियार्तः' इस वाक्य का ऐसा अर्थ करते हैं कि 'अहंकार से पीड़ित संसारी जीव अनीश्वर हैं' अर्थात् संसारी जीव कार्यों में ईश्वर की कारणता को स्वीकृत नहीं करते हैं क्योंकि एक स्वभाव वाले ईश्वर से किसी को नरक हो तथा किसी को स्वर्ग हो इस तरह विभिन्न कार्यों की उत्पत्ति नहीं हो सकती। कार्यों की विभिन्नता देखते हुए यदि यह माना जाय कि जिसका जैसा अदृष्ट होता है उसे ईश्वर वैसा ही नरक अथवा स्वर्ग देता है तो इस मान्यता से यही सिद्ध होता है कि जीवों की भवितव्यता ही नरक अथवा स्वर्गादि का कारण है न कि ईश्वर। क्योंकि भवितव्यता के बिना स्वतन्त्र रूप से ईश्वर कुछ नहीं कर सकता। हे सुपार्श्व जिनेन्द्र ! यह उत्तम-हितकारक बात आपने कही है, कारण कार्य के विषय में यह हितकारक मार्ग आपने लोगों को बताया है ॥ ३॥

एतदेव दर्शयन्नाह—

बिभेति मृत्योर्न ततोऽस्ति मोक्षो नित्यं शिवं वाञ्छति नास्य लाभः ।
तथापि बालो भयकामवश्यो वृथा स्वयं तप्यत इत्यवादीः ॥ ४ ॥

बिभेतीत्यादि—बिभेति त्रस्यति, जन्तुः कस्मात् ? मृत्योः, न च ततो बिभ्यदप्यसौ भवित-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

व्यंतासामर्थ्यादुद्भिद्यत इत्याह–नेत्यादि–ततो मृत्योर्मोक्षो मुक्तिर्न जन्तोरस्ति विद्यते। तथा नित्यं सर्वदा शिवं सुखं निर्वाणं वा वाञ्छति जन्तुः भवितव्यतायां तु प्रतिकूलायां नास्य शिवस्य लाभः प्राप्तिः तथापि तत्प्रतिकूलतायां तंदलाभेऽपि बालो अज्ञो जन्तुः भयकामवश्यो भयं मरणादौ त्रासः कामः सुखाद्यभिलाषस्तयोर्वश्य आधीनो वृथा मुधा स्वयमात्मना तप्यते क्लिश्यत इत्येवं अवादीरब्रवीस्त्वम्। यो हि प्रेक्षापूर्वकारी स प्रतिकूलायां भवितव्यतायां नेष्टं कार्यं सिध्यतीति ज्ञात्वा तदनुकूलता सिद्धयर्थमेव यतते तत्सिद्धौ च सर्वमिष्टकार्यं सिध्यतीति ॥ ४॥

आगे यही दिखलाते हुए कहते हैं—

अन्वयार्थ—यह जीव (मृत्योः) मरण से (बिभेति) डरता है परन्तु (ततः) उससे (मोक्षः) छुटकारा (न अस्ति) नहीं है (नित्यं) सदा (शिवं) कल्याण अथवा निर्वाण की (वाञ्छति) इच्छा करता है परन्तु (अस्य लाभः न) इसकी प्राप्ति नहीं होती (तथापि) फिर भी (भयकामवश्यः) भय और काम के वशीभूत हुआ (बालः) अज्ञानी प्राणी (स्वयं) स्वयं ही (वृथा) निष्प्रयोजन (तप्यते) दुःखी होता है। हे भगवन् (इति) यह आपने (अवादीः) कहा है।

भावार्थ—ऊपर के श्लोक में भवितव्यता को अलंघ्यशक्ति बतलाया था इस श्लोक में भी उसी की पुष्टि करते हुए कहा है कि भवितव्यता की अनुकूलता न होने पर यह जीव मृत्यु से डरता है—मृत्यु से बचने के लिये बुद्धिपूर्वक अनेक प्रयास करता है परन्तु आयु कर्म के उदय की अनुकूलता न होने पर मृत्यु से इसका छुटकारा नहीं होता—रञ्चमात्र भी आयु में वृद्धि नहीं होती। इसी प्रकार निरन्तर सुख की इच्छा करता है परन्तु कर्मोदय की अनुकूलता न होने पर इसे सुख प्राप्त नहीं होता अथवा मोक्ष की इच्छा करता है उसके अनुकूल तपश्चरण आदि भी करता है परन्तु उपादान—आत्मा की अनुकूलता न होने पर इसे मोक्ष की प्राप्ति नहीं होती। यह जीव दोनों कारणों की अनुकूलता का ध्यान न रख मात्र अपने पुरुषार्थ के बल पर कार्य सिद्ध करना चाहता है और कार्य सिद्ध न होने पर दुःख का अनुभव करता है इस सब में मूल कारण इस जीव का बालभाव-अज्ञान ही है—हे सुपार्श्व जिनेन्द्र! यह यथार्थ बात आपने बतलाई है ॥ ४॥

न तु हेयोपादेये च तत्त्वे यथावत् परिज्ञाते उपदेशः प्रमाणतां प्रतिपद्यते न च भगवतस्तत्परिज्ञानं संभवतीत्याशङ्क्याह—

सर्वस्य तत्त्वस्य भवान्प्रमाता मातेव बालस्य हितानुशास्ता।
गुणावलोकस्य जनस्य नेता मयापि भक्त्या परिणूयसेऽद्य ॥ ५॥

सर्वस्येत्यादि—सर्वस्य हेयोपादेयस्य तत्कारणभूतस्य च तत्त्वस्य भवान् सुपार्श्वजिनः प्रमाता प्रकर्षेण संशयादिव्यवच्छेदलक्षणेन माता परिच्छेदकः, स इत्थंभूतो भगवान् बालस्य हेयोपादेयविवेकविकलस्य हितानुशास्ता–हितं निश्रेयसं तत्कारणं च सम्यग्दर्शनादि तस्यानुशास्ता उपदेशकः। क इव कस्य? मातेव बालस्य इव शब्दो यथार्थे यथा वालस्यापत्यस्य वा माता जननी हितमुपकारकमनुशास्ति तथा भगवानप्यज्ञस्य जन्तोर्हितमुपादिशत्। भगवान् किं सर्वस्य सन्मार्गे प्रवर्तको भवति किं वा कस्यचिदेवेत्याशङ्क्याह–गुणावलोकस्येत्यादि–गुणान्मोक्ष हेतुभूतान् सम्यग्दर्शनादी-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नवलोकते अन्वेषत इति गुणावलोको जनो भव्यजन इत्यर्थः तस्य नेता सन्मार्गप्रवर्तकः। यत इत्थंभूतो भगवान् ततो मयापि न केवलं गणधरदेवादिभिः किन्तु मयापि समन्तभद्रस्वामिना स्तावकेन परिप्राप्तसन्मार्गं स्वरूपेण परिसमन्तात् मनोवाक्कायैः स्तूयसे अद्य इदानीम् ॥ ५ ॥

यहाँ कोई कहता है कि हेयोपादेय तत्त्व का ठीक २ ज्ञान होने पर ही उनका उपदेश प्रामाणिकता को प्राप्त होता है—

अन्वयार्थ—(भवान्) आप (सर्वस्य तत्त्वस्य) समस्त जीवादि पदार्थों के (प्रमाता) संशयादि रहित ज्ञाता हैं, (बालस्य) सन्तान को (मातेव) माता के समान (बालस्य) अज्ञानी जनों को (हितानुशास्ता) हित का उपदेश देने वाले हैं और (गुणावलोकस्य जनस्य) सम्यग्दर्शनादि गुणों का अन्वेषण करने वाले भव्यसमूह के (नेता) सन्मार्गदर्शक हैं अतः (अद्य) आज (मयापि) मुझ समन्तभद्र के द्वारा भी हे सुपार्श्वजिनेन्द्र ! (त्वम्) आप (भक्त्या) भक्तिपूर्वक (परिणूयसे) मन, वचन, काय से स्तुत हो रहे हैं—मैं मनसा वाचा कर्मणा आपकी स्तुति कर रहा हूँ।

भावार्थ—इस श्लोक के पूर्व शंका उठाई गई थी कि हेयोपादेय तत्त्व का ठीक-ठीक ज्ञान होने पर ही वक्ता का उपदेश प्रमाणता को प्राप्त होता है परन्तु भगवान् के हेयोपादेय तत्त्व का ठीक ज्ञान सम्भव नहीं है—इस शंका का उत्तर देते हुए कहा गया है कि—भगवान् सुपार्श्वनाथ समस्त तत्त्वों के प्रमाता हैं—संशय, विपर्यय और अनध्यवसाय से रहित ज्ञाता हैं। जिस प्रकार माता अपनी सन्तान को विना किसी स्वार्थभावना के हित का उपदेश देती है उसी प्रकार भगवान् सुपार्श्वनाथ भी हेयोपादेय के विवेक से निकल अज्ञानी जन को हित—मोक्ष तथा उसके कारण—सम्यग्दर्शनादि का उपदेश देते हैं तथा सम्यग्दर्शनादि गुणों का अवलोकन करने वाले भव्य जीवों के नेता हैं—सन्मार्ग के दर्शक हैं इन्हीं सब कारणों से आज मैं भगवान् सुपार्श्व जिनेन्द्र की स्तुति करता हूँ ॥५॥

इति सुपार्श्वजिनस्तवनम् ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(८) श्रीचन्द्रप्रभजिनस्तवनम्

चन्द्रप्रभं चन्द्रमरीचिगौरं चन्द्रं द्वितीयं जगतीव कान्तम् ।
वन्देऽभिवन्द्यं महतामृषीन्द्रं जिनं जितस्वान्तकषायबन्धम् ।। १ ।।

चन्द्रप्रभमित्यादि—उपजातिच्छन्दः। चन्द्रस्येव प्रभा यस्यासौ चन्द्रप्रभः अष्टमतीर्थंकरस्य संज्ञेयं, अन्वर्था चेयं संज्ञा, एतदेव चन्द्रेत्यादिना दर्शयति–चन्द्रस्य मरीचयः किरणास्तद्वद् गौरं शुक्लं तथाभूतं भगवन्तं जगति द्वितीयमिव चन्द्रं कथंभूतं कान्तं सकलार्थोद्योतिकेवलज्ञानप्रभाभराधारतया चन्द्रादतिशयेन कान्तं कमनीयं दीप्तं, तमित्थंभूतं चन्द्रप्रभं भगवन्तं वन्दे। पुनरपि कथंभूतं ? अभिवन्द्यं अभिसमन्ताद्वन्द्यं पूज्यं महतां महद्भिरिन्द्रादिभिरित्यर्थः, ऋषीन्द्रं ऋषीणां गणधर देवादीनामिन्द्रं स्वामिनं, जिनमशेषकर्मोन्मूलकं, जितेत्यादि–अत्र त्रिधा पाठः–केचित्तावज्जितस्वान्तकषायबन्धमिति पठन्ति, अस्यायमर्थः स्व इत्यनेन चन्द्रप्रभस्वामी गृह्यते तस्यान्तो धर्मो न प्रकृत्यादेः स चासौ कषायबन्धश्च स जितो येन स [1]तथोक्तस्तं। केचित्तु जितास्वान्त-कषायबन्धमिति पठन्ति–अस्यायमर्थः सुखेन अन्तो विनाशः स्वन्तः न विद्यते स्वन्तो यस्य कषायबन्धस्यासावस्वन्तो जितोऽस्वन्तः कषायबन्धो[2] येन स तथोक्तस्तमिति [3][अन्ये तु जितास्वान्तकषायमिति पठन्ति। अत्रायमर्थः स्वान्तं मनः प्रकृति विकाररूपं तस्य कषायैः क्रोधादिभिः बन्धो नात्मनेति सांख्यमतं तत्तथा निषिध्यते, न स्वान्त कषाय बन्धः अस्वान्त कषाय बन्ध आत्मनस्तद्बन्ध इत्यर्थः जितो अस्वान्त कषाय बन्धो येन स तथोक्तमिति।] ॥१॥

भगवान् के चन्द्रप्रभ नाम की सार्थकता बतलाते हैं—

अन्वयार्थ—मैं (चन्द्रमरीचिगौरं) चन्द्रमा की किरणों के समान गौर वर्ण (जगति) संसार में (द्वितीयं चन्द्रमिव कान्तं) दूसरे चन्द्रमा के समान सुन्दर, (महतां) इन्द्र आदि बड़े-बड़े जनों के (अभिवन्द्यं) वन्दनीय, (ऋषीन्द्रं) गणधरादि ऋषियों के स्वामी (जिनं) कर्म रूप शत्रुओं को जीतने वाले और ([4]जितस्वान्तकषायबन्धम्) अपने विकारी भाव स्वरूप कषाय के बन्धन को जीतने वाले (चन्द्रप्रभं) चन्द्रमा के समान कान्ति के धारक चन्द्रप्रभ नामक अष्टम तीर्थङ्कर को (वन्दे) वन्दना करता हूँ।

भावार्थ—इस श्लोक में अष्टमतीर्थंकर के बाह्य और आभ्यन्तर रूपों का वर्णन करते हुए समन्तभद्रस्वामी ने उन्हें नमस्कार किया है। बाह्य रूप का वर्णन करते हुए कहा है कि वे चंद्रमा के समान प्रभा के धारक थे, चन्द्रमा की किरणों के समान गौर वर्ण थे और अपनी सुन्दरता से ऐसे जान पड़ते थे मानों जगत् के दूसरे चन्द्रमा ही हों। तथा आभ्यन्तर रूप का वर्णन करते हुए कहा है कि वे कर्म रूप शत्रुओं को जीतने के कारण जिन कहलाते थे, उन्होंने अपने विकारी भाव स्वरूप कषाय के बन्ध को जीत लिया था, इसीलिए गणधरादि ऋषियों के वे स्वामी थे और इन्द्र आदि बड़े-बड़े पुरुष उन्हें सब ओर से नमस्कार करते थे ॥१॥

---

१. यथोक्तस्तं ख.।   २. कषायात्मबन्धो ख.।   ३. कोष्ठकान्तर्गतः पाठः क. प्रतौनास्तिः।
४. यहाँ संस्कृत टीकाकार ने तीन प्रकार के पाठों का उल्लेख किया है जो संस्कृत टीका में दृष्टव्य हैं।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पुनरपि कथंभूतं चन्द्रप्रभमित्याह—

यस्याङ्गलक्ष्मीपरिवेषभिन्नं तमस्तमोरिव रश्मिभिन्नम् ।
ननाश बाह्यं बहुमानसं च ध्यान-प्रदीपातिशयेन भिन्नम् ॥ २ ॥

यस्येत्यादि—यस्य चन्द्रप्रभतीर्थङ्कर देवस्याङ्गलक्ष्मीपरिवेषभिन्नं अङ्गं देहस्तस्य लक्ष्मीः परमकान्तिस्तस्या परिवेषो मण्डलं तेन भिन्नं विदारितं ननाश नष्टं किं तत् ? तमः, कैरिवेत्याह— तमोरेरित्यादि–तमसोऽन्धकारस्यारिस्तमोरिरादित्यस्तस्य रश्मयः किरणास्तैरिव भिन्नं ध्वस्तं न केवलं बाह्यमेव ननाश बहु मानसं च मनसि चिदात्मन्यात्मस्वरूपे भवं मानसं तमोऽज्ञानं कथंभूतं ? बहु प्रचुरमनेक प्रकारं ज्ञानावरणादेर्येन्निबन्धनं, चकारः समुच्चये, कथंभूतः सन् ? तन्ननाशेत्याह– ध्यानेत्यादि–ध्यानमेव प्रदीपोऽज्ञानतमोऽपहन्तृत्वात् तस्यातिशयः परम प्रकर्षस्तेन भिन्नं विदारितं ॥२

चन्द्रप्रभ भगवान् की विशेषता बतलाते हुए कहते हैं—

अन्वयार्थ—([1]यस्य) जिनके (अंगलक्ष्मी परिवेषभिन्नं) शरीर सम्बन्धी दिव्य प्रभामण्डल से विदारित (बहु) बहुत सारा (बाह्यं तमः) बाह्य अन्धकार (च) और (ध्यान प्रदीपातिशयेन) शुक्लध्यान रूपी श्रेष्ठ दीपक के अतिशय से (भिन्नं) विदारित (बहु) बहुत सारा (मानसं तमः) मानसिक अज्ञानान्धकार (तमोरेः) सूर्य की (रश्मिभिन्नं) किरणों से विदारित (तम इव) अन्धकार के समान (ननाश) नष्ट हो गया था।

भावार्थ—जिस प्रकार सूर्य की किरणों से खण्डित हुआ दिग्दिगन्त व्यापी रात्रि सम्बन्धी अन्धकार नष्ट हो जाता है उसी प्रकार जिन चन्द्रप्रभ भगवान् के शरीर की श्रेष्ठ कान्ति के मंडल से खण्डित हुआ निकटवर्ती अन्धकार का भारी समूह नष्ट हो गया था तथा जिनके शुक्लध्यान-रूपी प्रकृष्ट श्रेष्ठतम दीपक के अतिशय से खण्डित हुआ बहुत सारा मानसिक अन्धकार—अज्ञान का समूह नष्ट हो गया था, वे चन्द्रप्रभ भगवान् मेरे मन को पवित्र करें। पूर्व श्लोक के समान इस श्लोक में भी चन्द्रप्रभ भगवान् के बाह्य और आभ्यन्तर दोनों रूपों का दिग्दर्शन किया गया है ॥२॥

इत्थंभूतस्य च भगवतो वचः श्रुत्वा स्वपक्षाहङ्कारच्युताः परवादिनः संपन्ना इति दर्शयन्नाह—

स्वपक्षसौस्थित्यमदावलिप्तावाक्सिंहनादैर्विमदा बभूवुः ।
प्रवादिनो यस्य मदार्द्रगण्डा गजा यथा केसरिणो निनादैः ॥ ३ ॥

स्वपक्षेत्यादि—स्वस्य पक्षो मतं तस्य सौस्थित्यं सुस्थितत्वं तस्मिन्मदोऽस्मदीयमेव मतं शोभनं वाधा रहितं वाधाविधुरं यथा भवत्येवं स्थितं नान्यदिति दर्पः तेनावलिप्ताः समन्विताः के

---

१. २, ३, और ४ श्लोक का क्रिया सम्बन्ध ५ श्लोक से है।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ते ? प्रवादिनः प्रगतं प्रमाणानुपपन्नं वदन्तीत्येवंशीलाः प्रवादिनोऽन्यतीर्थास्ते बभूवुः संजाताः ? कथंभूताः ? विमदा विगतदर्पाः, कैः ? वाक्सिंहनादैः वाचः सिंहनादाः पर पराजयहेतुत्वात् अजय्यत्वाच्च तैः, कस्य ? यस्य चन्द्रप्रभस्वामिनः, दृष्टान्तमाह—मदार्द्रेत्यादि यथा केसरिणः सिंहस्य निनादैः शब्दैर्गजा हस्तिनो मदार्द्रगण्डा मदार्द्रकपोला विमदा बभूवुस्तथा भगवद्वचोभिः परवादिन इति ॥३॥

अब इस प्रकार के भगवान् के वचन सुनकर प्रतिवादी मद रहित हो गये यह कहते हैं—

अन्वयार्थ—(यथा) जिस प्रकार (केसरिणः) सिंह की (निनादैः) गर्जनाओं से (मदार्द्रगण्डाः) मद से गीले गण्डस्थलों के धारक (गजाः) हाथी (विमदाः) मद से रहित हो जाते हैं [तथा] उसी प्रकार (यस्य) जिनके (वाक्सिंहनादैः) वचन रूप सिंहनादों के द्वारा (स्वपक्षसौस्थित्यमदावलिप्ताः) अपने मत-पक्ष की सुस्थिति के घमण्ड से गर्वीले (प्रवादिनः) प्रवादीजन (विमदाः) गर्व रहित (बभूवुः) हो जाते थे।

भावार्थ—यहाँ भगवान् चन्द्रप्रभ के अकाट्य वचनों की महिमा प्रकट की जा रही है। कहा गया है कि उनके वचन इतने अकाट्य-युक्ति संगत होते थे कि उन्हें सुनकर अच्छे-अच्छे प्रवादियों का मद चूर हो जाता था। साधारण प्रवादी नहीं किन्तु ऐसे प्रवादी जो अपने पक्ष की स्थिरता में अहङ्कार से लिप्त थे, जिन्हें इस बात का अभिमान था कि हमारे पक्ष को कोई खण्डित नहीं कर सकता। और वे भी उस तरह मद रहित होते थे जिस तरह कि सिंह की गर्जना सुनकर बड़े-बड़े मदस्रावी हाथी मद रहित होते हैं। जिनके वचनों की ऐसी महिमा है वे चन्द्रप्रभ भगवान् हमारे मन को पवित्र करें ॥३॥

पुनरपि किं विशिष्टो यो भगवान् संपन्न इत्याह—

यः सर्वलोके परमेष्ठितायाः पदं बभूवाद्भुतकर्मतेजाः ।
अनन्तधामाक्षरविश्वचक्षुः समन्तदुःखक्षयशासनश्च ॥ ४ ॥

यः सर्वलोक इत्यादि—यः चन्द्रप्रभतीर्थंकर देवः सर्वलोके त्रिभुवने परमेष्ठितायाः परमे पदे तिष्ठतीति परमेष्ठी परमाप्तः तस्य भावः परमेष्ठिता परमाप्तता तस्याः पदं स्थानं बभूव संजातः। कथंभूतः ? अद्भुत-कर्मतेजाः अद्भुतमचिन्त्यं कर्मणोऽनुष्ठानविशेषात्सकाशात् तेजः केवलज्ञानलक्षणं परमज्योतिर्यस्य, यदि वा अद्भुतमचिन्त्यं कर्मणि सकल प्राणिगण प्रबोधनव्यापारे निमित्तभूतं तेजः केवलज्ञानस्वरूपः पदार्थप्रकाशो यस्य स तथोक्तः, पुनरपि कथंभूत इत्याह—अनन्तेति—अनन्तं च तद्धाम च केवलज्ञानं तदेवाक्षरमविनश्वरं शाश्वतं विश्वस्मिन् लोकालोके चक्षुर्यस्य। न केवलं प्रागुक्त विशेषण विशिष्ट एव भगवानपि तु समन्तदुःखक्षयशासनश्च समन्तात् निःशेषतो दुःखानां चतुर्गतिभुवां क्षयो विनाशो यस्मात् तत् समन्तदुःखक्षयंमोक्ष प्रदमित्यर्थः तत्तथाविधं शासनं मतं यस्य ॥ ४ ॥

भगवान् फिर कैसे हैं यह बतलाते हैं—

अन्वयार्थ—(यः) जो (सर्वलोके) समस्त संसार में (परमेष्ठितायाः) परमाप्तपना के

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(पदं) स्थान (बभूव) थे, (अद्भुत कर्मतेजाः) तीव्रतपश्चरण रूप कार्य से जिनका तेज अद्भुत अचिन्त्य था अथवा समस्त प्राणि-समूह को प्रतिबोधित करने रूप कार्य में जिनका केवलज्ञान रूप तेज आश्चर्य कारक था, (अनन्तधामाक्षरविश्वचक्षुः) अनन्त केवलज्ञान ही जिनका लोकालोक को प्रकाशित करने वाला अविनाशी चक्षु था, (च) और जिनका शासन चतुर्गति के दुःखों का क्षय करने वाला था।

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

हैं इससे भी विदित होता है कि आप मानसिक विकार पर पूर्ण विजय प्राप्त कर चुके हैं। संसारी प्राणियों के हृदय में निर्दय क्रोध का वास है उस क्रोध के वशीभूत होकर वे भयंकर शस्त्रों द्वारा शत्रु का नाश कर अपने क्रोध को शान्त करना चाहते हैं परन्तु हे भगवन् ! आप भयंकर शस्त्रों के बिना ही हृदय में बसने वाले क्रोध का बिलकुल नाश कर चुके हैं इससे सिद्ध होता है कि आप काम तथा क्रोध को जन्म देने वाले मोह से रहित हैं। और मोह से रहित होने के कारण शान्ति के स्थान हैं। आपकी इन सभी विशेषताओं से आकृष्ट होकर मैं आपकी शरण में आया हूँ। आप मेरी रक्षा कीजिये मेरे काम, क्रोधादि विकारों को दूर कर मुझे आप शान्ति-सुख का स्थान बनाइये ॥ ५ ॥

इति नमिजिनस्तवनम्

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(२२) श्री अरिष्टनेमिजिनस्तवनम्

भगवानृषिः परमयोगदहनहुतकल्मषेन्धनः ।
ज्ञानविपुलकिरणैः सकलं प्रतिबुध्यबुद्धकमलायतेक्षणः ।। १ ।।

भगवानित्यादि—विषमजातौ [1]उद्गतानाम छन्दः । भगवान् विशिष्टज्ञानवा निन्द्रादीनां पूज्यो वा, अरिष्टनेमिरिति द्वितीयवृत्तगतेनाभिसम्बन्धः, कथंभूतः ? ऋषिः परमर्द्धिसंपन्नः, पुनरपि कथंभूत इत्याह-परमेत्यादि-परमश्चासौ योगश्च शुक्लध्यानं स एव दहनः कल्मषं ज्ञानावरणादि कर्म तदेवेन्धनं तद्दहने हुतं शलमषेन्धनं येनासौ परमयोग दहनहुतकल्मषेन्धनः, किं कृत्वा ? प्रतिबुद्धय प्रकाश्य ज्ञात्वा, किं तत् ? सकलं लोकालोक जातं, कैः ? ज्ञानविपुल किरणैः ज्ञानमेव विपुला विस्तीर्णा निरवशेषोद्योतनसमर्थाः किरणा रश्मयस्तैः, पुनरपि कथंभूतो ? बुद्धकमलायतेक्षणः बुद्धं विकसितं तच्च तत्कमलं कमलशब्देनात्र तत्पत्रमुच्यते तद्वदायते दीर्घे ईक्षणे लोचने यस्य स ।। १ ।।

एतद्विशेषणविशिष्टो भगवान् कथंभूतः संजात इत्याह—

हरिवंशकेतुरनवद्यविनयदमतीर्थनायकः ।
शीलजलधिरभवो विभवस्त्वमरिष्टनेमिजिनकुञ्जरोऽजरः ।। २ ।।

हरीत्यादि—अभवः आसीत् भूतवान् कथंभूतो ? विभवो विगतभवः संसारमुक्त इत्यर्थः, किंनामा त्वमित्याह-अरिष्टनेमीत्यादि—अरिष्टनेमिनामा अरिष्टानां कर्मणां नेमिश्चक्रधारा स चासौ जिनकुञ्जरश्च जिनानां देशजिनानां कुञ्जरो नायकः प्रधानः, पुनरपि कथंभूतः ? अजरो न विद्यते जरा वार्द्धक्यमस्येति, पुनरपि किं विशिष्टः ? हरिवंशकेतुः हरिवंशे विष्णुवंशे केतुः ध्वजः, पुनरपि कथंभूतः ? अनवद्यविनयदमतीर्थनायकः न विद्यतेऽवद्यं दोषोऽनयोरित्यनवद्यौ तौ च तौ विनयदमौ च ज्ञानदर्शनतपश्चारित्रोपचारभेदाद्विनयः पञ्चविधः पञ्चेन्द्रियजयेनाद्दमोऽपि, अनवद्यता चानयोर्मर्यादिरहितत्वात् तयोस्तीर्थं तत्प्रतिपादकं प्रवचनं तस्य नायकः प्रवर्तकः, पुनरपि किंविशिष्टः ? शीलजलधिः शीलानां जलधिः शीलसमुद्रः, ।। २ ।।

इन विशेषणों से विशिष्ट भगवान् कैसे हुए यह बतलाते हैं—

अन्वयार्थ—(भगवान्) जो विशिष्ट ज्ञानवान् अथवा इन्द्रादि के द्वारा पूज्य हैं, (ऋषिः) जो परम ऋद्धियों से सम्पन्न हैं, (परमयोग-दहनहुतकल्मषेन्धनः) उत्कृष्ट शुक्लध्यान रूपी अग्नि

---

१. प्रथमे सजौ यदि सलौ च, नसजगुरुकाण्यनन्तरम् ।
यद्यथ भनजलगाः स्युरथो सजसा जगौ च भवतीयमुद्गता ।। (छन्दोमञ्जरी)
जिसके प्रथम चरण में सगण जगण, सगण और लघु, द्वितीय चरण में नगण, सगण, जगण और गुरु, तृतीय चरण में भगण नगण, नगण, जगण, लघु और गुरु तथा चतुर्थ चरण में सगण, जगण सगण, जगण और गुरु हो उसे उद्गता छन्द कहते हैं । यह विषम जाति का छन्द है ।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

में जिन्होंने कर्मरूपी ईंधन को होम दिया है, (बुद्धकमलायतेक्षण:) जिनके नेत्र खिले हुए कमल के समान विशाल हैं (हरिवंशकेतु:) जो हरिवंश के प्रधान हैं, (अनवद्य-विनयदम-तीर्थनायक:) जो निर्दोष विनय और इन्द्रियदमन के प्रतिपादक शास्त्र के प्रवर्तक हैं, (शीलजलधि:) जो शील के समुद्र हैं, और (अजर:) जो वृद्धावस्था से रहित हैं ऐसे (त्वं) आप (अरिष्टनेमि-जिनकुञ्जर:) अरिष्ट नेमि जिनेन्द्र (ज्ञानविपुलकिरणै:) ज्ञान रूप विस्तृत किरणों के द्वारा (सकलं) समस्त लोकालोक को (प्रतिबुद्धय) प्रकाशित कर अथवा जानकर (विभव:) संसार से मुक्त (अभव:) हुए थे।

भावार्थ—इन श्लोकों में अरिष्ट नेमिजिनेन्द्र की शारीरिक, कौलिक तथा आध्यात्मिक विशेषता का वर्णन किया गया है। शारीरिक विशेषता का वर्णन करते हुए लिखा है कि वे विकसित कमलदल के समान नेत्रों से युक्त थे तथा उनका शरीर जरा—बुढ़ापा से रहित था। शलाका पुरुषों के शरीर में जरा का असर नहीं होता उनका शरीर जीवन पर्यन्त सोलह वर्ष के तरुण के समान रहा करता है फलत: नेमिजिनेन्द्र का शरीर भी वार्धक्य जनित विकार से रहित था। कौलिक विशेषता का वर्णन करते हुए लिखा गया है कि वे उस हरिवंश की पताका स्वरूप प्रधान थे जिसकी कि स्थापना कर्मभूमि के प्रारम्भ में भगवान् ऋषभदेव ने की थी, अथवा तात्कालिक हरि—कृष्ण नारायण के वंश के शिरोमणि थे। आध्यात्मिक विशेषताओं का वर्णन करते हुए कहा गया है कि उन्होंने उत्कृष्ट शुक्लध्यानरूपी अग्नि में कर्म रूपी ईंधन को होम दिया था, उसके फलस्वरूप उन्हें अनेक ऋद्धियाँ प्राप्त हुई थीं, अष्टप्रातिहार्य रूप उत्कृष्ट ऐश्वर्य से वे युक्त हुए थे, केवलज्ञान रूप विपुल-लोकालोक में प्रसरित होने वाली किरणों से उन्होंने सकल संसार को प्रकाशित किया था अथवा हित का उपदेश दिया था, दर्शन, ज्ञान, चारित्र, तप और उपचार के भेद से पाँच प्रकार की विनय और पञ्चेन्द्रियों के दमन रूप पांच प्रकार के दम का प्रतिपादन करने वाले तीर्थ की उन्होंने प्रवृत्ति की थी, वे शील के सागर थे, अठारह हजार शील के भेद उनमें पूर्णता को प्राप्त हुए थे अथवा विवाह के पूर्व ही राजमती का परित्याग कर जिन्होंने अपने जीवन में ब्रह्मचर्य का परम आदर्श प्राप्त किया था, और इन सब विशेषताओं के कारण वे अन्त में भवभ्रमण से छूट कर सदा के लिये मुक्त हो गये थे ॥ १–२ ॥

इत्थंभूतस्य, भगवतः पादयुगलं कीदृशमित्याह—

त्रिदशेन्द्रमौलिमणिरत्नकिरण–विसरोपचुम्बितम् ।
पादयुगलममलं भवतो विकसत्कुशेशय–दलारुणोदरम् ॥ ३ ॥

त्रिदशेन्द्रादि—त्रिदशा देवास्तेषामिन्द्राः स्वामिनस्तेषां मौलयो मकुटानि तेषु मणिरत्नानि मणयः पद्मरागादयस्त एव रत्नानि वज्रादीनि वा तेषां किरणास्तेषां विसराः प्रसरास्तैरुपचुम्बितं, किं तत् ? पादयुगलं, कथंभूतं अमलं न विद्यते मलं पापं यस्य, यद्दर्शने भव्यानां वा, कस्य सम्बन्धि तत् ? भवतः अरिष्ट–नेमि–तीर्थंकरदेवस्य, पुनरपि कथंभूतमित्याह–विकसदित्यादि–विकसच्च तत्कुशेशयं च पद्मं तस्य दलं पत्रं तद्वदरुणं रक्तं उदरं पादतलं यस्य तद् विकसत्कुशेशयदलारुणोदरं ॥ ३ ॥

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पुनरपि किं विशिष्टं पादयुगलमित्याह—

नखचन्द्ररश्मिकवचातिरुचिरशिखरांगुलिस्थलम् ।
स्वार्थनियतमनसः सुधियः प्रणमन्ति मन्त्रमुखरा महर्षयः ॥ ४ ॥

नखेत्यादि—नखा एव चन्द्रास्तेषां रश्मयः तेषां कवचः परिवेषः तेनातिरुचिरं शिखर-मग्रभागो यस्य तत्तथाविधमङ्गुलीनां स्थलमुन्नत—प्रदेशो यस्य पादयुगलस्य तत् नखचन्द्ररश्मिक-वचातिरुचिरशिखरांगुलिस्थलं, तत्किं कुर्वन्ति ? प्रणमन्ति, के ते ? महर्षयः, कथंभूता ? मन्त्रमुखराः मन्त्रेण सप्ताक्षरेण सामान्यस्तुतिरूपेण वा मुखरा वाचालाः, पुनरपि कथंभूताः ? सुधियः शोभना धीर्येषां, अतएव स्वार्थनियतमनसः स्वार्थे मोक्षलक्षणे नियतं नियन्त्रितं मनो यैः ॥ ४ ॥

ऐसे भगवान् के चरण युगल कैसे थे ? यह कहते हैं—

अन्वयार्थ—हे भगवन् ! (स्वार्थनियतमनसः) मोक्षरूप स्वार्थ में जिनके मन नियन्त्रित हैं (सुधियः) जो उत्तम वुद्धि से युक्त हैं और (मन्त्रमुखराः) जो 'णमो णेमिजिणाणं' इस सात अक्षर वाले मन्त्र से अथवा सामान्य स्तुति से वाचाल हैं ऐसे (महर्षयः) गणधरादि बड़े-बड़े ऋषि (भवतः) आपके (तत्) उस (पादयुगलं) चरणयुगल को (प्रणमन्ति) प्रणाम करते हैं (यत्) जो कि (त्रिदशेन्द्रमौलिमणिरत्नकिरणविमरोपचुम्बितम्) इन्द्रों के मुकुटों में लगे हुए मणियों और रत्नों की किरणों के समूह से चुम्बित हैं, (अमलं) निर्मल—उज्ज्वल हैं, (विकसत्कुशेशय-दला-रुणोदरं) जिनका तलभाग खिले हुए कमलदल के समान लालवर्ण का है, तथा (नखचन्द्र—रश्मि-कवचातिरुचिर शिखरांगुलिस्थलम्) जिनकी अंगुलियों का स्थान नख रूपी चन्द्रमा की किरणों के परिवेष से अत्यन्त मनोहर अग्रभाग से सहित है ।

भावार्थ—हे भगवन् ! आत्महित के इच्छुक तथा अतिशय बुद्धिमान् मर्हषि मन्त्रपाठ अथवा स्तोत्रपाठ करते हुए सदा आपके चरण युगल को नमस्कार करते रहते हैं। आपके उन चरणों में इन्द्र अपना मस्तक झुकाये हुए हैं जिससे उसके मुकुट सम्बन्धी पद्मराग आदि मणियों और हीरा आदि रत्नों की किरणों का समूह उनपर व्याप्त हो रहा है, आपका वह चरण युगल अत्यन्त निर्मल है, उसको पगतली खिले हुए कमल दल के समान लाल है और नखरूपी चन्द्रमा की किरणों का परिमण्डल उसकी अंगुलियों के स्थान को अत्यन्त मनोहर बना रहा है ॥ ३–४ ॥

न केवलं त एव भगवतः पादयुगलं प्रणमन्ति किन्त्वन्येऽपीत्याह—

द्युतिमद्रथाङ्गरविबिम्बकिरणजटिलांशुमण्डलः ।
नीलजलदजलराशिवपुःसह बन्धुभिर्गरुडकेतुरीश्वरः ॥ ५ ॥

द्युतीत्यादि—द्युतिरस्यास्तीति द्युतिमत्, तच्च तद्रथाङ्गं च चक्रं तदेव रविबिम्बं रवि रिव बिम्बमाकारो यस्य तस्य किरणास्तैर्जटिलं शबलितं मंशुमण्डलं देहदीप्तिसंघातो यस्य, अंसमण्डल इति च पाठः अंसस्य स्कन्धस्य मण्डलं विस्तारस्तैर्जटिलं यस्य गरुडकेतोः स तथोक्तः, पुनरपि कथंभूत इत्याह—नीलेत्यादि—नीलश्चासौ जलदश्च सजलमेघः स च जलराशिश्च समुद्रः ताविव वपुः शरीरं यस्य, नीलजलजदलराशि—इत्यादिश्च क्वचित् पाठः नीलजलजानि नीलोत्पलानि तेषां

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दलराशिः पत्रसंघातस्तत्तुल्यं वपुर्यस्य, कोऽसावित्थंभूतः ? गरुडकेतुर्गरुडध्वजो वासुदेवः, किंविशिष्टः ? ईश्वरः पृथ्वीपतिः, किमेकाकीत्याह–सह बन्धुभिरिति ॥ ५ ॥

न केवलं गरुडकेतुः किन्तु—

हलभृच्च ते स्वजनभक्तिमुदितहृदयौ जनेश्वरौ ।
धर्मविनयरसिकौ सुतरां चरणारविन्दयुगलं प्रणेमतुः ॥ ६ ॥

हलभृदित्यादि—हलभृच्च बलभद्रोऽपि, तौ द्वौ प्रणेमतुः स्तुतवन्तौ, किं तत् ? चरणारविन्दयुगलं चरणावेव अरविन्दे पद्मे तयोर्युगलं, कस्य ? ते तव, कथंभूतौ जनेश्वरौ जनस्य लोकस्य ईश्वरौ स्वामिनौ, पुनरपि कथंभूतौ ? स्वजनभक्तिमुदितहृदयौ स्वजने बन्धौ भक्तिरनुरागः तया मुदितं हृष्टं हृदयं ययोः, पुनरपि किंविशिष्टौ ? धर्मविनयरसिकौ धर्मार्थो विनयो धर्मविनयस्तत्र रसिकौ अनुरक्तौ, कथं प्रणेमतुः ? सुतरामत्यर्थेन ॥ ६ ॥

अन्वयार्थ—हे भगवान् ! (द्युतिमद्रथाङ्गरवि–बिम्बकिरणजटिलांशुमण्डलः) कान्तिमान् सुदर्शनचक्र रूपी सूर्य बिम्ब की किरणों से जिनकी कान्ति का मण्डल व्याप्त हो रहा है अथवा (जटिलांसमण्डलः–पाठ में) कान्तिमान् सुदर्शन चक्ररूपो सूर्य बिम्ब की किरणों से जिनके कन्धे का प्रदेश व्याप्त हो रहा है (नील जलद जलराशि वपुः) नील मेघ और समुद्र के समान जिनका श्याम शरीर है अथवा (नील जलज दल राशि वपुः-पाठ में) नील कमल के पत्रों के समान जिनका श्याम शरीर है तथा (ईश्वरः) जो तीन खण्ड पृथिवी के स्वामी हैं ऐसे (गरुडकेतुः) श्रीकृष्ण, (च) और (हलभृत्) बलभद्र इस प्रकार (स्वजन भक्ति मुदित हृदयों) आत्मबन्धु की भक्ति से जिनके चित्त प्रसन्न हो रहे थे, (जनेश्वरौ) जो लोक के स्वामी थे और (धर्म विनय रसिकौ) जो धर्मार्थ विनय के रसिक थे–ऐसे दोनों भाईयों ने (बन्धुभिः सह) अपने अन्य भाइयों के साथ (ते) आपके (चरणारविन्दयुगलं) चरणकमलों के युगल को (सुतरां) बार-बार (प्रणेमतुः) प्रणाम किया था ।

भावार्थ—भगवान् अरिष्ट नेमि के पिता समुद्र विजय दश भाई थे। इनमें समुद्र विजय सबसे बड़े थे और वसुदेव सबसे छोटे थे । वसुदेव के कृष्ण और बलराम ये दो पुत्र थे इनमें श्री कृष्ण नारायण थे और बलराम बलभद्र थे, श्रीकृष्ण की ध्वजा में गरुड का चिह्न था, उनका शरीर नीलमेघ और समुद्र अथवा नीलोत्पल की कलिकाओं के समूह के समान श्यामल था, उन्हें सूर्य के मण्डल के समान देदीप्यमान सुदर्शन चक्र प्राप्त था उसकी उज्ज्वल किरणों से उनके शरीर का कान्ति मण्डल व्याप्त हो रहा था अथवा उस सुदर्शन चक्र की किरणों के तमूह से उनका कन्धा देदीप्यमान हो रहा था, बलराम बलभद्र थे ये हल नामक शस्त्र के धारक थे, ये दोनों ही भाई समस्त जनता के स्वामी थे, तथा धर्म को विनय के अत्यन्त रसिक थे, भगवान् अरिष्टनेमि इनके बड़े दादा के पुत्र होने से भाई थे तीर्थंकर के रूप में अपने भाई को प्रतिष्ठा देख कृष्ण और बलराम के हृदय अत्यन्त प्रसन्न हो रहे थे। ये दोनों ही भाई अपने अन्य अनेक भाईयों के साथ मिलकर भगवान् अरिष्टनेमि के चरण कमल युगल को बार-बार प्रणाम करते थे ॥ ५–६ ॥

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यत्र पर्वते गत्वा भगवतश्चरणारविन्द युगलं तौ प्रणेमतुः स कीदृश इत्याह—

ककुदं भुवः खचरयोषिदुषितशिखरैरलंकृतः ।
मेघपटलपरिवीततटस्तव लक्षणानि लिखितानि वज्रिणा ।। ७ ।।

ककुदमित्यादि—ककुदमिव ककुदं, कस्याः ? भुवः पृथिव्याः, यथा ककुदं वृषभोपरिस्कन्ध-प्रदेशस्थं सर्वतः तदवयवानामुपरिवर्ति शोभाकरि च तथा उर्जयन्ताचलः सकलभूम्यवयवाना-मित्यर्थः, पुनरपि किंविशिष्ट इत्याह–खेचरेत्यादि खे चरन्तीति खचरा विद्याधरास्तेषां योषितो विद्याधर्यः ताभिरुषितानि सेवितानि च शिखराणि तैरलंकृतः शोभितः, पुनरपि कथंभूतो ? मेघपट-लपरिवीततटः मेघानां पटलानि तैः परि समन्ताद् वीतानि व्याप्तानि तटानि सानूनि यस्य, पुनरपि कथंभूत इत्याह–तवेत्यादि–तव अरिष्टनेमेः लक्षणानि चिह्नानि लिखितानि उत्कीर्णानि, केन ? वज्रिणा इन्द्रेण तानि लक्षणानि ।। ७ ।।

वहतीति तीर्थमृषिभिश्च सततमभिगम्यतेऽद्य च ।
प्रीतिविततहृदयैः परितो भृशमूर्जयन्त इति विश्रुतोऽचलः ।। ८ ।।

वहतीत्यादि—वहति धरति इति हेतोः तीर्थं पुण्यस्थानं अतएव ऋषिभिश्च ऋषिभिरपि सततं सर्वकालं अभिगम्यते समाश्रीयते सेव्यते, कदा ? अद्य च इदानीमपि, कथंभूतैः प्रीतिवितत-हृदयैः प्रीत्या तुष्टया विततानि विस्तीर्णानि उल्लासितानि हृदयानि येषां तैः, कथं ? परितः समन्तात्, अयमेतद्विशेषणविशिष्टोऽचलः पर्वतः कथंभूतो लोके ? विश्रुतः प्रख्यातः, कथं ? ऊर्जयन्त इत्येवं, भृशमत्यर्थम् ।। ८ ।।

जिस पर्वत पर नारायण और बलभद्र ने प्रणाम किया था उस ऊर्जयन्तगिरि का वर्णन करते हैं—

अन्वयार्थ—(भुवः ककुदम्) जो पृथिवी का ककुद है—बैल के कन्धे के समान ऊँचा तथा शोभा उत्पन्न करने वाला है, (खचरयोषिदुषितशिखरैः) जो विद्याधरों की स्त्रियों से सेवित शिखरों के द्वारा (अलंकृतः) सुशोभित है (मेघपटलं परिवीततटः) जिसके तट मेघों के समूह से घिरे रहते हैं (वज्रिणा लिखितानि तव लक्षणानि वहति–इति तीर्थं) जो इन्द्र के द्वारा लिखे हुए (हे नेमिजिन !) आपके चिह्नों को धारण करता है इसलिये तीर्थ स्थान है, (सतत अद्य च) हमेशा तथा आज भी (प्रीतिविततहृदयैः) प्रीति से विस्तृतचित्तवाले (ऋषिभिश्च) ऋषियों के द्वारा जो (परितः) सब ओर से (भृशं) अत्यधिक (अभिगम्यते) सेवित है (इति) ऐसा वह (विश्रुतः) अतिशय प्रसिद्ध (ऊर्जयन्तः अचलः) ऊर्जयन्त नाम का पर्वत है (जिस पर जाकर कृष्ण और बलराम ने आपके चरण कमल युगल को प्रणाम किया था) ।

भावार्थ—सौराष्ट्र देश का ऊर्जयन्त पर्वत जो शास्त्रों में रैवतक गिरि के नाम से प्रसिद्ध है तथा चालू भाषा में जिसे गिरनार कहते हैं, भगवान् अरिष्टनेमि के समवसरण से अनेकों बार पवित्र हुआ है, वह समान धरातल से बहुत ही ऊँचा है और ऐसा जान पड़ता है मानों पृथिवी का कांधोल हो, उसकी ऊँची-ऊँची शिखरों पर विद्याधरों की स्त्रियाँ क्रीडा किया करती हैं, उसके तट मेघों के समूह घिरे रहते हैं, इन्द्र ने उस पर भगवान् अरिष्टनेमि के चिह्नों को अथवा यशः-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रशस्तियों को वज्र से उत्कीर्ण किया था इसलिये वह लोक में तीर्थ समझा जाता है, बड़े-बड़े ऋषि सदा से उस पर्वत की सेवा करते आ रहे हैं और आज भी प्रीति से विस्तृत चित्त होकर आत्म-कल्याण के इच्छुक लोग सब ओर से आकर उस पर्वत की सेवा करते हैं उसी पर्वत पर जब भगवान् अरिष्टनेमि का समवसरण आया तब द्वारिकापति श्रीकृष्ण और बलराम अपने अन्य अनेक भाइयों के साथ वहाँ पहुँचे, अपने चचेरे भाई भगवान् नेमिनाथ के समवसरण सम्बन्धी वैभव को देखकर दोनों का चित्त प्रसन्नता से भर गया और अपने कुल को धन्य मानते हुए भगवान् के चरण कमलों में बार-बार प्रणाम करने लगे ॥ ७-८ ॥

अत्राह मीमांसके यदुक्तं ज्ञानविपुलकिरणैरिति, तत्र भगवतो ज्ञानमिन्द्रियजं ज्ञानत्वादस्मदादिज्ञानवदतः कथं सर्वज्ञता स्यादित्याशङ्क्याह—

बहिरन्तरप्युभयथा च करणमविघाति नार्थकृत् ।
नाथ ! युगपदखिलं च सदा त्वमिदं तलामलकवद्विवेदिथ ॥ ९ ॥

बहिरन्तरपीत्यादि—बहिः करणं चक्षुरादि, अन्तरपि करणं मनोलक्षणं, तत्प्रत्येकमुभयथा च, अविघाति सर्वज्ञतास्वरूपस्य विघातकं न भरमति, उपकारकं तर्हिस्यादित्यत्राहनेत्यादि—नार्थकृत् न स्वकार्यकारि, यत एव मतः हे नाथ ! त्वं विवेदिथ ज्ञातवान्, किं तत् ? इदं जगत्, किं क्रमेण ? युगपदेकहेलया, किं ? नियतमखिलं च निरवशेषमेव, किं नियत कालं ? सदां सर्वदाकालं, किमिव ? तलामलकवत् तले करतले आमलकः स्फटिकमणिः, स इव तद्वत् ॥ ९ ॥

यत एवं विवेदिथ त्वम्—

अतएव ते बुधनुतस्य चरितगुण-मद्भुतोदयम् ।
न्यायविहितमवधार्य जिने त्वयि सुप्रसन्नमनसः स्थिता वयम् ॥ १० ॥

अतएवेत्यादि—अतएवास्मादेव कारणात्, ते तव, कथंभूतस्य ? बुधनुतस्य बुधैर्गणधरदेवादिभिर्नुतःस्तुतस्तस्य, चरित्रमनुष्ठानं तस्य गुणो निर्विघ्नतः स्वसाध्यप्रसाधकत्वं, किंविशिष्टं ? अद्भुतोदयं अद्भुत साश्चर्य उदयः समवशरण केवलज्ञानादिलक्षणा लक्ष्मीर्यस्य तत्, पुनरपि विविशिष्टं ? न्याय विहितं न्यायेन नीत्या आगम—प्रतिपादितोपपत्त्या विहितं कृतमनुष्ठितं, इत्थंभूतं त्वद्गुणमवधार्य संचिन्त्य त्वयि अरिष्टनेमि—तीर्थंकरदेवे, कथंभूते ? जिने अशेषकर्मोन्मूलके, स्थिताः प्राञ्जलीभूय व्यवस्थिताः ते के ? वयं स्तोतारः, कथंभूताः ? सुप्रसन्नमनसः सुष्ठु प्रसन्नं विशुद्धं भक्त्यानुगृहीतं मनो येषाम् ॥ १० ॥

आगे भगवान् नेमि जिनेन्द्र के सर्वज्ञता सिद्ध करते हैं—

अन्वयार्थ—(हे नाथ) हे स्वामिन् ! (त्वं) आप (इदं अखिलं) इस समस्त संसार को (युगपत् च सदा) एक साथ और सर्वदा (तलामलकवत्) हस्ततल पर रखे हुए स्फटिक के समान जानते हैं तथा आपके इस जानने में (बहिः) बाह्य (च) और (अन्तरपि) अभ्यन्तर (करणं) इन्द्रियाँ पृथक्-पृथक् (च उभयथा) और दोनों प्रकार से (अविघाति) बाधक नहीं हैं एवं (अर्थकृत् न) उपकारक भी नहीं हैं (अतएव) इसीलिये (बुधनुतस्य) विद्वानों के द्वारा

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्तुत (ते) आपके (अद्भुतोदयम्) आश्चर्य कारक अभ्युदय से युक्त तथा (न्यायविहितं) न्याय सिद्ध—आगम ज्ञान से सिद्ध (चरितगुणं) स्वकार्य की प्रसाधकता का (अवधार्य) निश्चय कर (वयं) हम (सुप्रसन्नमनसः) अत्यन्त प्रसन्न चित्त होते हुए (त्वयिजिने) आप जिनेन्द्र में (स्थिताः) स्थित हुए हैं—अपने कार्य का साधक समझ आपकी शरण में आये हैं।

भावार्थ—मीमांसकों का कहना है कि अस्मदादि के समान भगवान् का ज्ञान भी इन्द्रिय-जन्य ही है अतः ज्ञान रूप विपुल किरणों के द्वारा वे समस्त संसार को प्रतिबुद्ध करते हैं—जानते हैं यह कहना संगत नहीं है। उनके इस कथन का उत्तर देते हुए कहा गया है कि हे भगवान्! आप बाह्य और आभ्यन्तर दोनों इन्द्रियों की सहायता के बिना ही इस समस्त संसार को हस्ता-मलकवत् सदा एक साथ स्पष्ट जानते हैं। इन्द्रियाँ आपके ज्ञान में न बाधा करती हैं और न उपकार ही। चूँकि आपका ज्ञान इन्द्रिय निरपेक्ष होकर आत्म-सापेक्ष ही है इसलिये वह ज्ञान गुण के चरमविकास स्वरूप केवलज्ञान के द्वारा समस्त लोक-अलोक को जानता है। आपकी इस विशेषता से आकृष्ट होकर समस्त विद्वान् आपकी स्तुति करते हैं। आपके चरित का माहात्म्य समवसरणादि रूप आश्चर्यकारक अभ्युदय से सहित है तथा आगम की प्रतिपत्ति से सिद्ध है यह सब निश्चय कर हम बड़ी प्रसन्नता से आपकी शरण में आये हैं, आपके भक्त बने हैं॥ ९–१० ॥

इति नेमिजिनस्तवनम्

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(२३) श्रीपार्श्वजिनस्तवनम्

तमालनीलैः सधनुस्तडिद्गुणैः प्रकीर्ण-भीमाशनिवायुवृष्टिभिः ।
बलाहकैर्वैरिवशैरुपद्रुतो महामना यो न चचाल योगतः ॥ १ ॥

तमालनीलैरित्यादि—वंशस्थच्छन्दः । न चचाल न चलितवान्. कस्मात् ? योगतः परमशुक्लध्यानात्, किंविशिष्टः ? उपद्रुतः पीडितः कैः ? बलाहकैर्मेघैः, कथंभूतैः ? तमालनीलैः तमाला वृक्षविशेषाः तद्वत् नीलैः नीलवर्णैः, पुनरपि कथंभूतैः ? सधनुस्तडिद्गुणैः गुणा ज्याः तडित एव गुणाः, धनुषामिन्द्रचापानां तडिद्गुणा धनुस्तडिद्गुणाः तैः सह वर्तन्त इति सधनुस्तडिद्गुणास्तैः, पुनरपि किंविशिष्टैः ? वैरिवशैः कमठवशवर्तिभिः, कथंभूतो यः पार्श्वनाथ भगवान् ? महामना महत् परीषहेभ्योऽक्षुभितं मनो यस्य ॥ १ ॥

उपसर्ग के समय भगवान की निश्चलता का वर्णन करते हैं—

अन्वयार्थ—(तमालनीलैः) तमाल वृक्ष के समान नीलवर्ण, (सधनुस्तडिद्गुणैः) इन्द्र धनुषों और बिजली रूप डोरियों से सहित, (प्रकीर्ण-भीमाशनिवायुवृष्टिभिः) भयंकर वज्र आँधी और वर्षा को बिखेरनेवाले ऐसे (वैरिवशैः) शत्रु के वशीभूत (बलाहकैः) मेघों के द्वारा (उपद्रुतः) उपद्रुत होने पर भी (महामनाः) उत्कृष्ट धैर्य के धारक (यः) जो पार्श्वनाथ भगवान् (योगतः) शुक्लध्यान रूप योग से (न चचाल) विचलित नहीं हुए थे ।

भावार्थ—भगवान् पार्श्वनाथ मुनि अवस्था में अहिक्षेत्र के तपोवन में ध्यानारूढ़ थे । पूर्वभव का वैरी कमठ जो कि अब कालसंवर नामका ज्योतिष्क देव हुआ था वहाँ से निकला, भगवान् पार्श्वनाथ को देखते ही उसे पूर्वभव का वैर स्मृत हो गया । वैर के वशीभूत हो उसने उपसर्ग का निश्चय कर विक्रिया से काली घनघटा के द्वारा दिग्दिगन्त को आच्छादित कर दिया, उस घनघटा में इन्द्र धनुष दिखने लगे और बिजलियाँ कौंदने लगीं, वज्रपात हुए, जोरदार आँधी चली और भयंकर वर्षा हुई परन्तु इस दैविक उपद्रव के होते हुए भी उनका मन रञ्चमात्र भी क्षोभ को प्राप्त नहीं हुआ । वे अपने शुक्लध्यानरूपी योग से जरा भी विचलित नहीं हुए । इसी घटना का चित्रण इस श्लोक में किया गया है ॥ १ ॥

भगवतः उपसर्गोपनिपातं ज्ञात्वा धरणेन्द्रः किं कृतवानित्याह—

बृहत्फणामण्डलमण्डपेन यं स्फुरत्तडित्पिङ्गरूचोपसर्गिणम् ।
जुगूह नागो धरणो धराधरं विरागसंध्यातडिदम्बुदो यथा ॥ २ ॥

बृहत्फणेत्यादि—जुगूह वेष्टितवान्, कोऽसौ ? नागः, किंनामा ? धरणेन्द्रनामा, केनेत्याह—बृहदित्यादि—बृहत्यश्च ताः फणाश्च तासां मण्डलं चक्रं संघातश्च तस्य मण्डपस्तदेव वा मण्डपस्तेन, कथंभूतेन ? स्फुरत्तडित्पिङ्गरूचा स्फुरन्ती चासौ तडिच्च स्फुरत्तडित् तस्या इव पिङ्गा पीता रुक् दीप्तिर्वर्णो यस्य तेन, कथंभूतं यं पार्श्वनाथं ? उपसर्गिणमुपसर्गवन्तं, क इव कं जुगहेत्याह—धराधरमित्यादि—धराधरं पर्वतं यथा जुगूह, कोऽसौ ? विरागसंध्या तडिदम्बुदः तडितोपलक्षितोऽम्बुदस्तडिदम्बुदः, विगतो रागो यस्या साचासौ संध्या च कृष्णसंध्या तस्यां तडिदम्बुदः, विविधो वा

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रागो नीलपीतादिवर्णो यस्याः सा चासौ संध्या च तया तुल्या या तडित् तया उपलक्षितोऽम्बुदः, विरागसंध्यायां वा तडिता उपलक्षितोऽम्बुदः पिङ्गः ॥ २ ॥

आगे धरणेन्द्र के द्वारा उपसर्ग निवारण का वर्णन करते हैं—

अन्वयार्थ—(उपसर्गिणं) उपसर्ग से युक्त (यं) जिन पार्श्वनाथ भगवान् को (धरणो नागः) धरणेन्द्र नामक नागकुमार देव ने (स्फुरत्तडित्पिङ्गरूचा) चमकती हुई बिजली के समान पीली कान्ति से युक्त (बृहत्फणामण्डलमण्डपेन) बहुत भारी फणामण्डल रूपी मण्डप के द्वारा (तथा) उस तरह (जुगूह) वेष्टित कर लिया था (यथा) जिस तरह कि ([1]विराग संध्या तडिदम्बुदः,) काली संध्या के समय बिजली से युक्त मेघ (धराधरं) पर्वत को वेष्टित कर लेता है।

भावार्थ—भगवान् पार्श्वनाथ ने मरणोन्मुख नागनागिनी के लिये पञ्च नमस्कार मन्त्र दिया था उसके प्रभाव से नाग धरणेन्द्र हुआ था और नागिनी पद्मावती देवी। जब कमठ के जीव कालसंवर ने भगवान् पार्श्वनाथ पर प्रथम श्लोक में प्रतिपादित उपसर्ग किया तब धरणेन्द्र ने आकर विक्रिया से एक नाग का रूप बनाया और बहुत भारी फणामण्डल के द्वारा उन पर छाया कर ली। अपने विशाल फणामण्डल से भगवान् को वेष्टित करता हुआ धरणेन्द्र ऐसा जान पड़ता था मानों कालोसंध्या के समय बिजली से युक्त मेघ किसी पर्वत को वेष्टित कर रहा हो ॥ २ ॥

उपसर्गनिवारणानन्तरं भगवान् किं कृतवानित्याह—

स्वयोगनिस्त्रिंशनिशातधारया निशात्य यो दुर्जयमोहविद्विषम् ।
अवापदार्हन्त्यमचिन्त्यमद्भुतं त्रिलोकपूजातिशयास्पदं पदम् ॥ ३ ॥

स्वयोगेत्यादि—अवापत् प्राप्तवान्, किं तत् ? आर्हन्त्यम्, किं कृत्वा ? निशात्य विनिपात्य विनाश्य, कं ? दुर्जयमोहविद्विषम् मोह एव विद्विट् दुर्जयश्चासौ मोहविद्विट् तं, कयेत्याह—स्वयोगेत्यादि—स्वस्य योगः परमशुक्लध्यानं स एव निस्त्रिंशः खड्गः तस्य निशाता तीक्ष्णीकृता या धारा योगाभ्यासपर्यन्तरूपा तया, कथंभूतमार्हन्त्यं ? अचिन्त्यं [2]चिन्ताया अप्यगोचरं, अद्भुतं साश्चर्यगुणोपेतं, पुनरपि किंविशिष्टं ? पदं स्थानं, कथंभूतं पदं ? त्रिलोकपूजातिशयास्पदं त्रिलोकानां पूजा तस्या अतिशयः परमप्रकर्षः तस्यास्पदमाश्रयः ॥ ३ ॥

उपसर्ग को जीत कर भगवान् अरहन्त पद को प्राप्त हुए यह कहते हैं—

अन्वयार्थ—(यः) जिन्होंने (स्वयोगनिस्त्रिंशनिशातधारया) अपने शुक्लध्यानरूप खड्ग की तीक्ष्ण धारा के द्वारा (दुर्जयमोहविद्विषम्) मोह रूपी दुर्जय शत्रु को (निशात्य) नष्ट कर (अचिन्त्यं) अचिन्तनीय (अद्भुतं) आश्चर्य कारक गुणों से युक्त (त्रिलोकपूजातिशयस्पदं)

---

१. 'विराग संध्या तडिद्बुम्बुदः' का एक अर्थ यह भी है—विविध रङ्गों वाली संध्या के समान बिजली से युक्त मेघ, अथवा विविध रङ्गो वाली संध्या के समय बिजली से सहित मेघ।

२. ख प्रती इत आरभ्य पाठो नास्त्येव।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्रिलोक की पूजा के अतिशय के स्थान (आर्हन्त्यं पदम्) आर्हन्त्य पद को (अवाप्त) प्राप्त किया था।

भावार्थ—उधर कालसंवर, भगवान् पार्श्वनाथ पर उपसर्ग कर रहा था इधर वे शुक्लध्यान में निमग्न हो क्षपकश्रेणी पर आरूढ़ हो रहे थे। कालसंवर का उपसर्ग भगवान् को अपने पथ से विचलित नहीं कर सका उन्होंने शुक्लध्यानरूप खड्ग की तीक्ष्ण धारा से मोहरूप दुर्जेय शत्रु को नष्ट कर अन्तर्मुहूर्त बाद वह आर्हन्त्य पद प्राप्त कर लिया जिसका छद्मस्थ–अल्पज्ञ प्राणी विचार हो नहीं कर सकते थे, जो समवसरणादि विभूति के कारण आश्चर्य उत्पन्न कर रहा था तथा त्रिलोकवर्ती–शतइन्द्र जिसकी पूजा करते थे ॥ ३ ॥

इत्थंभूतं च पार्श्वनाथतीर्थंकरदेवं दृष्ट्वा वनवासिनस्तापसाः स्वप्रयासे विफलतया भवन्मार्गेण तथा भवितुमिच्छन्तीति दर्शयन्नाह—

यमीश्वरं वीक्ष्य विधूतकल्मषं तपोधनास्तेऽपि तथा बुभूषवः ।
वनौकसः स्वश्रमबन्यबुद्धयः शमोपदेशं शरणं प्रपेदिरे ॥ ४ ॥

यमित्यादि—यं पार्श्वनाथं, वीक्ष्य विलोक्य, कथंभूतं ? ईश्वरं सकललोकप्रभुं, पुनरपि कथंभूतं ? विधूतकल्मषं विधूतं विनाशितं कल्मषं घातिकर्मचतुष्टयरूपं पापं येनासौ तथोक्तस्तं, के ते वीक्ष्य ? तपोधनाः तापसाः, किंविशिष्टाः ? वनौकसो वनेऽटव्यामोको गृहं येषां ते वनौकसो वनवासिनः तेऽपि परदर्शनानुयायिनः न केवलं भवद्दर्शनानुयायिनः शरणं प्रपेदिरे, किं कर्तुमिच्छवः ? तथा बुभूषवः तथा भगवत्प्रकारेण बुभूषवो भवितुमिच्छवः, कथंभूताः सन्तः ? स्वश्रमवन्ध्यबुद्धयः स्वस्य श्रमः पञ्चाग्निसाधनादिप्रयासस्तस्मिन् वन्ध्याविफला बुद्धिर्येषां ते, इत्थंभूताः सन्तः किं कृतवन्तः ? शमोपदेशं शरणं प्रपेदिरे शमस्य सकलसंसारोपरमस्य निखिलरागाद्युपशमस्य वा उपदेशो मोक्षमार्गस्तं, यदि वा शमस्य उपदेशो यस्मादसौ शमोपदेशो भगवान् तं शरणं प्रपेदिरे प्रतिपन्नाः ॥ ४ ॥

भगवान् पार्श्वनाथ के प्रभाव से वशीभूत होकर अन्य तापस भी उनकी शरण आये यह बतलाते हैं—

अन्वयार्थ—(यं) जिन पार्श्वनाथ भगवान् को (ईश्वरं) समस्त लोक के ईश्वर तथा (विधूतकल्मषं) घातिचतुष्क रूप पाप से रहित (वीक्ष्य) देखकर (तथा बुभूषवः) उन्हीं के समान होने के इच्छुक (वनौकसः) बनवासी (ते तपोधनाः अपि) वे तपस्वी भी (स्वश्रमबन्ध्यबुद्धयः) अपने प्रयास में निष्फल बुद्धि होते हुए (शमोपदेशं) मोक्षमार्ग अथवा शान्ति का उपदेश देने वाले भगवान् पार्श्वनाथ की (शरणं प्रपेदिरे) शरण को प्राप्त हुए थे।

भावार्थ—भगवान् अरिष्टनेमि के मोक्ष चले जाने के बाद चौरासी हजार का लम्बा अन्तराल बीत चुका था इस बीच में अन्यमतावलम्बियों का प्रचार भी भारतवर्षमें खूब हो गया था। अपने-अपने सिद्धान्तानुसार अन्य लोग तापस के वेष में आत्मसाधना करने में निमग्न हो रहे थे, कोई पञ्चाग्नि तप तपता था, कोई धूम्रपान करता था, कोई एक हाथ ऊपर उठाकर तप करता था और कोई रात-दिन खड़ा रह कर ही तपश्चरण करता था। इस प्रकार की तपश्चर्या करते

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

हुए उन्हें लम्बा समय बीत गया पर कुछ फल की प्राप्ति नहीं हुई। उधर भगवान् पार्श्वनाथ केवल चार मास की तपश्चर्या के द्वारा चार घातिया कर्मों को नष्ट कर तीन लोक के ईश्वर बन गये थे, उनके समवसरण की रचना हो चुकी थी, तथा समस्त देव, दानव उनके प्रभाव से नत-मस्तक हो गये। भगवान् पार्श्वनाथ की तपस्या के इस प्रत्यक्ष सिद्ध फल को देख कर वनवासी अन्य तपस्वी अपने श्रम को निष्फल समझने लगे, उनके मन में भी यह इच्छा उत्पन्न हुई कि हम भी भगवान् पार्श्वनाथ के द्वारा गृहीत मार्ग पर चल कर उन जैसा बनें। इसी इच्छा से प्रेरित होकर अन्य अनेक साधु उनकी शरण को प्राप्त हुए—अपने मिथ्या तप को छोड़ कर भगवान् पार्श्वनाथ के अनुयायी हुए ॥ ४ ॥

य एवंविधो भगवान् स किं क्रियते इत्याह—

स सत्यविद्यातपसां प्रणायकः समग्रधीरुग्रकुलाम्बरांशुमान् ।
मया सदा पार्श्वजिनः प्रणम्यते विलीन–मिथ्यापथदृष्टिविभ्रमः ॥ ५ ॥

स इत्यादि—स प्रागुक्त–विशेषण–विशिष्टः पार्श्वजिनः प्रणम्यते, केन ? मया समन्तभद्र स्वामिना, किं कदाचित् ? सदा सर्वकालं, कथंभूतः स इत्याह-समग्रधीः समग्रा संपूर्णा केवलज्ञान-लक्षणा धीर्यस्य, पुनरपि किं विशिष्टः उग्रकुलाम्बरांशुमान् उग्रं च तत्कुलं च तदेव अम्बरमाकाशं तस्य अंशुमान् चन्द्रस्तदुद्योतकत्वात्, पुनरपि किं विशिष्ट इत्याह—विलीनेत्यादिमिथ्या चासौ पन्थाश्च मिथ्यादर्शनादिकुमार्गः तन्निबन्धना दृष्टयो मतानि तैर्जनिता विभ्रमाः सर्वथानित्यक्षणिका-द्वैतवादिसमारोपाः विलीना विनष्टास्ते यस्माद्भव्यानां स तथोक्तः ॥ ५ ॥

अन्वयार्थ—(सत्यविद्यातपसां प्रणायकः) जो सत्य विद्याओं तथा तपस्याओं के प्रणेता थे, (समग्रधीः) जो पूर्ण केवलज्ञान के धारक थे (उग्रकुलाम्बरांशुमान्) जो उग्र वंश रूपी कुल के चन्द्रमा थे, और (विलीनमिथ्यापथदृष्टिविभ्रमः) जिन्होंने मिथ्या मार्ग सम्बन्धी कुदृष्टियों से उत्पन्न विभ्रमों को नष्ट कर दिया था (सः) वे (पार्श्वजिनः) पार्श्व जिनेन्द्र (मया) मुझ समन्तभद्र के द्वारा (सदा) हमेशा (प्रणम्यते) प्रणत किये जाते हैं—मैं उन्हें प्रणाम करता हूँ ॥ ५ ॥

भावार्थ—भगवान् पार्श्वनाथ उग्रवंश में उत्पन्न हुए थे उन्होंने अपने आपके द्वारा उस उग्रवंश को उस तरह प्रकाशित किया था जिस तरह कि चन्द्रमा आकाश को प्रकाशित करता है। चूँकि भगवान् पार्श्वनाथ पूर्ण ज्ञानी थे—सर्वज्ञ थे, इसलिये उन्होंने अपने उपदेशों के द्वारा लोगों के मिथ्यामार्ग सम्बन्धी कुदृष्टियों के विभ्रमों को दूर कर उन्हें सम्यग्दृष्टि बनाया था और सम्यग्ज्ञान तथा सम्यक्तप–सम्यक्चारित्र की प्रवृत्ति चलाई थी इस तरह वे सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक्चारित्र रूप मोक्षमार्ग के प्रणेता थे। मैं भी मोक्ष का इच्छुक हूँ। इसलिये मोक्षमार्ग के प्रकृष्ट नायक भगवान् पार्श्वनाथ को मैं प्रणाम करता हूँ।

इति पार्श्वजिनस्तवनम्

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(२४) श्रीवीरजिनस्तवनम्

कीर्त्या भुवि भासि तया वीर ! त्वं गुणसमुच्छ्रया भासितया ।
भासोडुसभासितया सोम इव व्योम्नि कुन्दशोभासितया ॥ १ ॥

कीर्तेत्यादि—स्कन्धकच्छन्दः।[1] हे वीर! त्वं भासि शोभसे, क्व ? भुवि पृथिव्यां, कया ? कीर्त्या ख्यात्या, कथंभूतया तया कीर्त्या ? गुणसमुच्छ्रया गुणेभ्य आत्मशरीरगतेभ्यः समुच्छ्रा प्रादुर्भावो यस्याः सा तथोक्ता तया, अतएव भासितया शोभितया यदि वा भासितया उज्ज्वलया निर्मलया, अत्रदृष्टान्तमाह भासेत्यादि, सोम इव यथा सोमश्चन्द्रो व्योम्नि गगने भाति तथा त्वं कीर्त्या भासीति सम्बन्धः, कया सोमो भाति ? भासा दीप्त्या, किंविशिष्टया ? उडुसभासितया उडूनां नक्षत्राणां सभा उडुसभं तत्रासितया स्थितया, पुनरपि किंविशिष्टया ? कुन्दशोभासितया कुन्दानां शोभा कुन्दशोभा तद्वत् आसमन्तात सितया धवलया ॥ १ ॥

अन्वयार्थ—(हे वीर !) हे वर्धमान जिनेन्द्र ! (त्वं) आप (भुवि) पृथिवी पर (गुणसमुच्छ्रया) आत्मा और शरीर सम्बन्धी गुणों से उत्पन्न (भासितया) सुशोभित अथवा उज्ज्वल (तया) उस (कीर्त्या) ख्याति से (उडुसभासितया) नक्षत्रों की सभा में आसित–स्थित, एवं (कुन्दशोभासितया) कुन्दकुसुम की शोभा के समान सफेद (भासा) कान्ति से (व्योम्नि) आकाश में (सोम इव) चन्द्रमा के समान (भासि) सुशोभित होते हैं।

भावार्थ—भगवान् वर्धमान 'विशिष्टास् ईं लक्ष्मीं राति ददातीति वीरस्तस्सम्बुद्धो' विशिष्ट लक्ष्मी–आत्मीय सम्पत्ति को देने वाले थे इसलिये वीर कहलाते हैं। उनकी आत्मा सम्यग्दर्शनादि गुणों से तथा शरीर–सातिशयरूपता आदि गुणों से युक्त था इन सब गुणों के कारण उनकी कीर्ति सर्वत्र फैल रही थी। कवि लोग कीर्ति का वर्णन सफेद करते हैं। यहाँ उपमालंकार में उनकी कीर्ति का वर्णन करते हुए कहा गया है कि जिस प्रकार आकाश में नक्षत्र समूह में स्थित–व्याप्त तथा कुन्दपुष्प की शोभा के समान सफेद कान्ति से चन्द्रमा सुशोभित होता है उसी प्रकार हे वीर जिन ! गुणों से उत्पन्न एवं अतिशय सुशोभित अथवा उज्ज्वल कीर्ति से आप पृथिवी पर सुशोभित होते हैं॥ १ ॥

के ते भवदीयाः गुणाः येभ्यः सा समुत्थितेत्याह—

तव जिन ! शासनविभवो जयति कलावपि गुणानुशासनविभवः ।
दोषकशासनविभवः स्तुवन्ति चैनं प्रभाकृशासनविभवः ॥ २ ॥

तवेत्यादि– हे जिन ! जयति सर्वोत्कर्षेण वर्तते, कोऽसौ ! शासनविभवः, शास्यन्ते व्युत्पाद्यन्ते हेयोपादेयतत्वानि तेन तच्छासनं प्रवचनं तस्य विभवो माहात्म्यं यथावस्थिताशेषार्थप्रतिपादनलक्षणः, कदा ! कलावपि कलिकालेऽपि इदानीमपीत्यर्थः, कथंभूतो ? गुणानुशासनविभवः गुणेष्वनुशासनं शिक्षा येषां भव्यानां ते गुणानुशासनाः तेषां विगतो विनष्टो भवः संसारो यस्मात् स गुणा-

---

१. इसका दूसरा नाम आर्यागीति छन्द है। जिसके पूर्वार्ध तथा उत्तरार्ध में १२—२०—१२—२० मात्राएं हों उसे आर्यागीति कहते हैं।

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नुशासनविभवः, न केवलं जयति किन्तु स्तुवन्ति एनं शासनविभवं, के ते ! दोषकशासनविभवः दोषा एव कशाः चर्मयष्टिकाः पीडाकरत्वात् तेषामसनं क्षेपणं निराकरणं तस्य विभवः प्रभवः समर्था गणधरदेवादयः, कथंभूताः प्रभाकृशासनविभवः आसते लोका यत्र तदासनं त्रिभुवनं तस्य लोकप्रसिद्धया विभवो हरिहरादयः, प्रभया ज्ञानादितेजसा कृशास्तनूकृता आसनविभवो यैः, यदि वा प्रभया आकृशान्यासनानि सिंहासनानि येषां ते प्रभा कृशासनाः वर्द्धमान स्वामिनोऽन्ये केवलिनः इन्द्रादयो वा, ते च ते विभवश्च स्वामिनश्च ॥ २ ॥

अन्वयार्थं—(हे जिन) हे वोर जिनेन्द्र ! (गुणानुशासनविभवः) भव्यजीवों के भव को नष्ट करने वाला (तव) आपके (शासनविभवः) प्रवचन का यथावस्थित समस्त पदार्थों के प्रतिपादन रूप सामर्थ्यं (कलावपि) कलिकाल में भी (जयति) जयवन्त है—सर्वोत्कृष्ट रूप से वर्तमान है (च) और (प्रभाकृशासनविभवः) प्रभा—ज्ञानादितेज से आसनविभुओं—लोक के तथाकथित हरि हरादि स्वामिओं को कृश—महत्वहीन करने वाले (दोषकशासनविभवः) दोष रूप चाबुकों के निराकरण करने में समर्थं गणधरादि देव (एनं) आपके इस शासन विभव की—प्रवचन सामर्थ्यं की (स्तुविन्त) स्तुति करते हैं ॥ २ ॥

भावार्थं—आपके शासन का विभव पूर्वकाल में तो जयवन्त था ही किन्तु इस कलिकाल में भी जबकि वक्रपरिणामी जोवों की ही बहुलता है जयवन्त हो रहा है और जयवन्त होने का कारण यह है कि वह भव्यजीवों के भवभ्रमण को नष्ट करने वाला है। इतना ही नहीं आपके इस शासन की वे गणधरादि देव स्तुति भी करते हैं—निरन्तर प्रशंसा करते हुए तृप्त नहीं होते जो कि अज्ञान अथवा रागादि दोष रूपी चाबुकों का निराकरण करने में समर्थं हैं और अपनी प्रभा से जिन्होंने लोक विभुओं-हरिहरादि को कृश—महत्व हीन बना दिया है ॥ २ ॥

ते कथं शासनविभवं स्तुवन्तीत्याह—

अनवद्यः स्याद्वादस्तव दृष्टेष्टाविरोधतः स्याद्वादः ।
इतरो न स्याद्वादो द्वितयविरोधान्मुनीश्वरास्याद्वादः ॥ ३ ॥

अनवद्य इति—न विद्यते अवद्यं दोषोऽस्येत्यनवद्यो निर्दोषः, कोऽसौ ? स्याद्वादोऽनेकान्तवादः, कुतो ? दृष्टेष्टाविरोधतः दृष्टं प्रत्यक्षादि इष्टमागमस्ताभ्यामविरोधतः संवादात्, कथंभूतः सोऽनेकान्तरूपः स्याद्वादः ? स्याद्वादः उच्यते प्रतिपाद्यते येनासौ वादः शब्दः स्यादिति वादो वाचकः शब्दो यस्यानेकान्तवादस्यासौ स्याद्वादः, स्यादस्तीतिरूपः एकान्तवादः कुतोऽनवद्यो न भवतीत्याह—इतर इति—इतर एकान्तः, स्याद् भवेन्न वादो न प्रमाणभूतागमः, हे मुनीश्वर ? गणधरदेवादिमुनिस्वामिन् ?, कुतः स तथाभूतो न भवति ? द्वितयविरोधात्, दृष्टेष्टविरोधात्, तद्विरोधोऽप्यस्य कुतः ? अस्याद्वादो यतः स्यादस्तीत्यादिरूपो वादः स्याद्वादः स न विद्यते यत्र ॥ ३ ॥

अन्वयार्थ—(हे मुनीश्वर) हे मुनिनाथ ! (स्याद्वादः) 'स्यात्' इस कथचित् अर्थं के वाचक शब्द से सहित (तव) आपका (स्याद्वादः) स्यादस्तोत्यादि अनेकान्त रूप कथन (दृष्टेष्टाविरोधतः) प्रत्यक्ष तथा आगम आदि प्रमाणों से विरोध न होने के कारण (अनवद्यः) निर्दोष है। इसके विपरीत (अस्याद्वादः) 'स्यात्' इस शब्द से रहित (इतरः) अन्य जो (वादः) एकान्त रूप

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कथन है (सः) वह (द्वितय विरोधात्) दृष्ट और इष्ट–प्रत्यक्ष तथा आगम आदि प्रमाणों से विरोध होने के कारण (अनवद्यः) निर्दोष (न) नहीं है।

भावार्थ—प्रमाण के दो भेद हैं—(१) प्रत्यक्ष और (२) परोक्ष। इनमें प्रत्यक्ष को दृष्ट कहते हैं और अनुमान आगम आदि को इष्ट कहते हैं। हे गणधरादि मुनियों के स्वामी वीर जिनेन्द्र! आपने जो स्याद्वाद–अनेकान्त रूप उपदेश दिया है, वह 'स्यात्' इस अव्यय से सहित है तथा प्रत्यक्ष और परोक्ष प्रमाण का विरोध न होने से निर्दोष है–सब को मान्य है। इसके विपरीत 'स्यात्' इस अव्यय से रहित जो अन्य सुगत–कपिल–ईश्वर आदि का उपदेश है वह प्रत्यक्ष तथा परोक्ष प्रमाण से विरुद्ध होने के कारण निर्दोष नहीं है–सब को मान्य नहीं है॥ ३॥

अपरमपि भगवतो गुणं दर्शयन्नाह—

त्वमसि सुरासुरमहितो ग्रन्थिकसत्त्वाशयप्रणामामहितः।
लोकत्रयपरमहितोऽनावरणज्योतिरुज्ज्वलद्धामहितः ॥ ४॥

त्वमसीत्यादि—त्वं बर्द्धमानस्वामी, असि भवसि, किंविशिष्टः? सुरासुरमहितः सुरैरसुरैश्च महितः पूजितः, पूनरपि किंविशिष्टः? ग्रन्थिक—सत्त्वाशयप्रणामामहितः ग्रन्थो मिथ्यात्वादिर्विद्यते येषां ते ग्रन्थिका मिथ्यादृष्टयः ते च ते सत्त्वाश्च प्राणिनः तेषामाशयोऽभक्तं चित्तं तेन प्रणामस्तेनामहितोऽपूजितः, यदि वा ग्रन्थिकसत्त्वानामिवाशयो रागादिकलुषितं चित्तं येषां हरिहरादीनां ते ग्रन्थिकसत्त्वाशयाः तेषु प्रणामः 'कंकालमालाकुलितोरुदेह'—इत्यादिकस्तस्यास्ततः त्वमसि सुरासुरमहितः, पुनरपि कथंभूतः? लोकत्रयपरमहितः परमश्चासौ हितश्च परमहितो लोकत्रयस्य परमहितो लोकत्रयपरमहितः, पुनरपि किंविशिष्टः? अनावरणज्योतिरुज्ज्वलद्धामहितः अनावरणं च तज्ज्योतिश्च केवलज्ञानं तेन उज्ज्वलत्प्रकाशमानं तच्च तद्धाम मुक्तिस्थानं तत्र हितो गतः॥ ४॥

अन्वयार्थ—हे भगवान्! (त्वम्) आप (सुरासुरमहितः) सुरों तथा असुरों से पूजित हैं, किन्तु (ग्रन्थिकसत्त्वाशयप्रणामामहितः) मिथ्यादृष्टि प्राणियों के अभक्त हृदय से प्राप्त होने वाले प्रणाम से पूजित नहीं है, आप (लोकत्रयपरमहितः) तीनों लोकों के परम हितकारी हैं, और (अनावरणज्योतिरुज्ज्वलद्धामहितः) और केवलज्ञान से प्रकाशमान मुक्तिरूप स्थान को प्राप्त है।

भावार्थ—हे भगवान्! यद्यपि समस्त सुर और असुर आपकी पूजा करते हैं तथापि मिथ्यादृष्टि जीवों का अभक्त हृदय आपकी पूजा नहीं करता, आप उनके प्रणाम से रहित हैं। आप त्रिलोकवर्ती जीवों के परम हितैषी हैं तथा केवलज्ञान रूप निरावरण ज्योति से प्रकाशमान मोक्ष को प्राप्त हैं॥ ४॥

पुनरपि किंविशिष्टस्त्वमित्याह—

सभ्यानामभिरुचितं दधासि गुणभूषणं श्रिया चारुचितम्।
मग्नं स्वस्यां रुचि तं जयसि च मृगलाञ्छनं स्वकान्त्या रुचितम्॥ ५॥

सभ्यानामित्यादि—दधासि धारयसि, किं तद्? गुणभूषणं गुणानां भूषणमलंकारः, तत्कथं-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भूतं ? अभिरुचितमभीष्टं, केषां ? सभ्यानां समवसरणस्थितभव्यानां, पुनरपि कथंभूतं ? श्रिया चारुचितम् श्रिया विभूत्या चारु शोभनं यथाभवत्येवं चितमुपचितं पुष्टं, न केवलं दधासि जयसि च, कं ? मृगलान्छनं चन्द्रं, कया ? स्वकान्त्या स्व—शरीरदीप्त्या, किंविशिष्टं ? मग्नं निमग्नं, क्व ? रुचि दीप्तौ, किंविशिष्टायां ? स्वस्यामात्मीयायां, तं मृगलान्छनं कथंभूतं ? [1]रुचितं दीप्तं सकलप्राणिनामभीष्टं वा ॥ ५ ॥

अन्वयार्थ—हे भगवान् आप (सभ्यानां) समवशरण सभा में स्थित भव्यजीवों के (अभिरुचितं रुचिकर, तथा (श्रिया) अष्ट प्रातिहार्यरूप लक्ष्मी से (चारुचितं) सुन्दरता पूर्वक व्याप्त (गुणभूषणं) गुणों के भूषण को अथवा गुणरूप आभूषण को (दधासि) धारण करते हैं, (च) और (स्वकान्त्या) अपनी कान्ति के द्वारा (स्वस्यां रूचि) स्वकीय कान्ति में (मग्नं) निमग्न, (रुचितं) सुन्दर (तं मृगलान्छनं) उस चन्द्रमा को (जयसि) जीतते हैं ॥

भावार्थ—हे वीर जिनेन्द्र ! आप सर्वज्ञ वीतरागतादि गुणों के उस आभूषण को धारण करते हैं जो समवशरण में स्थित भव्यजनों को अत्यन्त रुचिकर है और अष्ट प्रातिहार्य रूप लक्ष्मी से सुन्दरतापूर्वक पुष्ट है—व्याप्त है। इतना ही नहीं आप अपने शरीर की दीप्ति से उस चन्द्रमा को भी जीतते हैं जो कि अपनी कान्ति में निमग्न है तथा अतिशय सुन्दर या सबका मन भावन है ॥ ५॥

के पुनर्गुणा यद्भूषणं भगवान्दधातीत्याह—

त्वं जिन ! गतमदमायस्तव भावानां मुमुक्षुकामद मायः ।
श्रेयान् श्रीमदमायस्त्वया समादेशि सप्रयामदमायः ॥ ६ ॥

त्वमित्यादि—हे जिन ! कथंभूतस्त्वम् ? गतमदमायः मदो दर्पो माया वञ्चना गते नष्टे मदमाये यस्य यस्माद्वा भव्यानां स गतमदमायः, यतएवमतएव हे जिन तव अस्ति, कोऽसौ ? मायः प्रमाणं केवलज्ञान लक्षणमागमस्वरूपं वा, केषां सम्बन्धी ? भावनां जीवादिपरार्थानां, कथंभूतः ? मुमुक्षुकामद मुमूक्षूणां मोक्षप्रकाङ्क्षिणां कामद मोक्षलक्षणवान्छितफलप्रद, किंविशिष्टो मायः ? श्रेयान् अतिशयेन प्रशस्यः, सकलबाधक रहितत्वात्, इत्थंभूतेत त्वया किं कृतं ? समादेशि कथितः, कोऽसौ ? श्रीमदमायः श्रियो मदः श्रीमदस्तस्य मायो नाशः मीङ् हिंसायामित्यस्य कृतात्वस्यायं प्रयोगः अथवा श्रीः हेयोपादेयतत्व—परिज्ञानादिलक्षणा स्वर्गापवर्गादि—प्रापकत्वलक्षणा वास्यास्तीति श्रीमान् सचासौ अमायश्च न विद्यते माया यस्येत्यमायोऽनुष्ठानविशेषः तथा सप्रयामदमायः त्वया समादेशि, यमो व्रतं यम एव यामः स्वार्थिकोऽण् प्रकृष्टो यामः प्रयामः सह प्रयामेन वर्तते इति सप्रयामः स चासौ दमश्च इन्द्रियजयः तस्यायमागमनम् ॥ ६ ॥

अन्वयार्थ—(मुमुक्षुकामद !) हे मोक्षाभिलाषी जीवों के मनोरथ को देने वाले (जिन !) वीर जिनेन्द्र ! (त्वं) आप (गतमदमाय;) गर्व और माया से रहित हैं तथा (तव) आपका (भावानां) जीवादि पदार्थ विषयक (मायः) केवलज्ञान अथवा आगम रूप प्रमाण (श्रेयान्)

---

१. रुचिरं स

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अत्यन्त श्रेष्ठ अथवा प्रशंसनीय है। हे भगवान्! (त्वया) आपने (श्रीमदमायः) लक्ष्मी के मद को नष्ट करने वाला अथवा स्वर्ग और मोक्ष को प्राप्त करने वाली श्रीलक्ष्मी से युक्त और माया से रहित (स प्रयामदमायः) श्रेष्ठ एवं प्रशस्त इन्द्रिय विजय का (समादेशि) उपदेश दिया है।

भावार्थ—हे वीर जिन! आप मद और माया तथा उपलक्षण से समस्त कषायों को नष्ट कर चुके हैं, मोक्ष की इच्छा रखते हुए जो भव्य जीव आपकी शरण में आते हैं आप उन्हें मोक्ष प्रदान कर उनके मनोरथों को पूर्ण करते हैं, जीवादि पदार्थ विषयक आपका प्रमाण–केवलज्ञान अत्यन्त श्रेष्ठ है तथा आपने भव्य जीवों को श्रेष्ठ महाव्रत और इन्द्रिय दमन का उत्तम उपदेश दिया है॥ ६॥

अपरमपि भगवतो गुणान् स्तोतुमाह—

गिरिभित्त्यवदानवतः श्रीमत इव दन्तिनः स्रवद्दानवतः।
तव शमवादानवतो गतमूर्जितमपगतप्रमादानवतः॥ ७।

गिरिमित्यादि—हे जिन! तव गतं गमनं अर्जितमुदारमुत्कृष्टं, किं कुर्वतः? अवतो रक्षतः, कान्? शमवादान् शमो दोषाणामुपसमः तस्य वादास्तत्प्रतिपादका आगमास्तान्, पुनरपि कथंभूतस्य? अपगत प्रमादानवतः प्रकृष्टा मा हिंसा प्रमा, अपगता नष्टा प्रमा अपगतप्रमा अहिंसा, अपगतप्रमाया दानमपगतप्रमा दानमभयदानं तदस्यास्तीत्यपगत प्रमादानवांस्तस्य दृष्टान्तमाह—श्रीमत इवेत्यादि-इव शब्दो भिन्नक्रमो दन्तिन इत्यस्यानन्तरं द्रष्टव्यः दन्तिन इव हस्तिन इव गतमित्यर्थः, कथंभूतस्य दन्तिनः? श्रीमतः सर्वलक्षणोपेतस्य भद्रजातेः, पुनरपि कथंभूतस्य? स्रवद्दानवतः स्रवच्च तद्दानं च मदः स्रवद्दानं तद्विद्यते यस्यासौ स्रवद्दानवांस्तस्य, अनेन स्यायत्तं तस्य गमनं प्रतिपादितं, पुनरपि किं विशिष्टस्य? गिरिभित्त्यवदानवतः गिरेः पर्वतस्य भित्तयः कटन्यस्तासामवदानं तद्विद्यते यस्यासौ गिरिभित्त्यवदानवांस्तस्य, अनेन महासामर्थ्यं तस्य सूचितम्॥ ७॥

अन्वयार्थ—हे भगवान्! (गिरिभित्त्यवदानवतः श्रीमतः स्रवद्दानस्य दन्तिनः इव) जिस प्रकार पहाड़ की कटनियों में पराक्रम से युक्त अर्थात् उनका विदारण करने वाले उत्तम जाति विशिष्ट तथा झरते हुए मद से सहित हाथी का (ऊर्जितं) बलशाली अर्थात् रुकावट से रहित (गतं) गमन होता है उसी तरह (शमवादान् अवतः) दोषों के उपशमन का उपदेश देने वाले शास्त्रों के रक्षक तथा (अपगतप्रमादानवतः) अभयदान से युक्त (तव) आपका (पूर्जितं) उत्कृष्ट (गतं) गमन-विहार हुआ था।

भावार्थ—यहाँ हाथी का दृष्टान्त देते हुए भगवान् महावीर के विहार का वर्णन किया गया है जिस प्रकार हाथी अपने गगन में रुकावट डालने वाले पर्वतों की दीवालों को गण्डस्थल की टक्कर से चूर-चूर कर आगे बढ़ता जाता है उसी प्रकार हे भगवान् आप भी अपने गमन में—(वस्तु) तत्व के प्रतिपादन में रुकावट डालने वाले मिथ्यादृष्टियों को अनेकान्त मत रूप वज्र के प्रहार से पराजित कर आगे बढ़ते जाते थे, जिस प्रकार हाथी श्रीमान् सर्व लक्षण संपन्न अथवा उत्तम जाति का होता है उसी प्रकार आप भी श्रीमान्-समवशरण रूप लक्ष्मी से युक्त

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

थे, जिस प्रकार हाथी स्रवद्दानवान्–झरते हुए मद जल से युक्त होता है उसी प्रकार आप भी स्रवदानवान्-दिये जाने वाले दानों से सहित थे, जिस प्रकार हाथी शमवादनअवतः—प्रेमपूर्ण मधुर शब्द बोलने वाले महावत आदि की रक्षा करता है उसी प्रकार आप भी शमवादान् अवतः—रागादि दोषों के शमन करने का उपदेश देने वाले शास्त्रों की रक्षा करते थे। और जिस प्रकार हाथी अपगत प्रमादान् अवतः–प्रमाद रहित–सावधान रहने वाले मनुष्यों की रक्षा करता है उसी प्रकार आप भी अपगतप्रमादानवतः-हिंसा रहित–अभयदान से युक्त थे जहाँ-जहाँ आपका विहार होता था वहाँ–वहाँ जीवों को अभय की प्राप्ति होती थी कोई किसी को मार नहीं सकता था। एवं जिस प्रकार हाथी का गमन ऊर्जित–बलिष्ठ–शक्ति संपन्न होता है—उसे कोई रोक नहीं सकता है इसी प्रकार आपका गमन–विहार भी ऊर्जित अत्यन्त उत्कृष्ट तथा स्वाधीन था, किसी की प्रेरणा से आपका विहार नहीं होता था और न किसी के रोकने पर रुकता था॥ ७॥

अथ परकीयं मतं भवदीयं च मतं—कीदृशमित्याह—

बहुगुणसम्पदसकलं परमतमपि मधुरवचनविन्यासकलम्।
नमभक्त्यवतंसकलं तव देव! मतं समन्तभद्रं सकलम्॥ ८॥

बहुगुणेत्यादि—बहवश्च ते गुणाश्च सर्वज्ञत्व वीतरागत्वादयः तेषां संपत्संपत्तिस्तया असकलमसंपूर्णं परस्य मतं, अपि शब्दादितरमपीति सम्बन्धः। पुनरपि कथंभूतं परमतं? मधुर वचन विन्यासकलं मधुराणि श्रुतिरमणीयानि तानि च तानि वचनानि च तेषां विन्यासो रचना तेन कलं मनोज्ञं। भवदीयं मतं कीदृशमित्याह—नयेत्यादि—हे देव! तव मतं शासनं समन्तभद्रं समन्ताद् भद्रं निर्बाधत्वेन सर्वतः शोभनं समन्ताद्वा भद्राणि कल्याणानि यस्य यस्माद्वा भव्यानां तत्तथोक्तं किं किन्चित्तथा भविष्यतीत्याह—सकलं समस्तं, पुनरपि कथंभूतमित्याह—नयभक्त्यवतंसकलं नया नैगमादयः तेषां भक्तयः स्यादस्तीत्यादिभङ्गाः सेवा वा, ताएवावतंसकं कर्णभूषणं तल्लातीति नयभक्त्यवतसकलमिति।

यो निःशेषजिनोक्तधर्मविषयः श्री गौतमाद्यैः कृतः
सूक्तार्थैरमलैः स्तवोऽयमसमः स्वल्पैः प्रसन्नैः पदैः।
सद्व्याख्यानमदो यथावगमतः किंचित्कृतं लेशतः
स्थेयाच्चन्द्रदिवाकरावधि बुधप्रह्लादिचेतस्यलम्[1]॥ १॥

इति श्री प्रभाचन्द्रविरचितायां क्रिया कलापटीकायां गौतमादि समन्तभद्र स्तुति विवरणो नाम द्वितीय परिच्छेदः।

श्रीरस्तु कल्याणमस्तु

अन्वयार्थ—(हे देव!) हे वीर जिन देव! (परमतं) अन्य एकान्तवादियों का शासन (मधुर-वचन विन्यासकलम् अपि) कर्णप्रिय वचनों के विन्यास से मनोज्ञ होता हुआ भी (बहुगुण

१. चैतस्यदः ख

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सम्पदसकलं) अत्यधिक गुण रूप सम्पत्ति से विकल है परन्तु (तव) आपका (मतं , (नय भवत्यवतंसकलं) नैगमादि नयों से उत्पन्न स्यादस्तीत्यादि भङ्ग रूप आभूषणों से अथवा नयों की उपासना रूप कर्णाभरण को देने वाला है, (समन्तंभद्रं) सब ओर से कारक है और (सकलं) पूर्ण है।

भावार्थ—यहाँ भगवान् वीर जिनेन्द्र के अनेकान्त मत तथा कपिल सुगतादि के एकान्तमत की तुलना करते हुए समन्तभद्र स्वामी कहते हैं कि हे भगवन् ! यद्यपि अन्यमत मधुर वचनों कलापूर्ण विन्यास से प्रिय है—श्रवण करने में अच्छे लगते हैं तथापि सत्यशासन के योग्य ज यथार्थवादिता परहितकारिता आदि गुण हैं उनसे विकल हैं परन्तु आपका मत नयों से उत्पन्न सप्तभङ्गीरूप आभूषणों से मनोज्ञ है नयों के प्रयोग से विभिन्न-विभिन्न अभिप्राय रखने वाले श्रोताओं के लिये प्रिय है अथवा नयों की उपासना से युक्त है, परस्पर विरोधी धर्मों का प्रतिपादक होने से सकल है—पूर्ण है और समन्तभद्र—सब ओर से कल्याण करने वाला है। यहाँ 'समन्तभ इस श्लेषात्मक पद द्वारा ग्रन्थकर्ता ने अपने समन्तभद्र नाम की सूचना दी है ॥ ८ ॥

इति वीरजिनस्तवनम्

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivale, Varanasi Collection.